संस्कृतसुधा

अष्टमी कक्ष्या

संयुक्तपाठ्यक्रमः

8th Sanskrit Reader (Composite Course)

© Government of Andhra Pradesh, Amaravati

First Published 2013

New Impressions 2014, 2015, 2016, 2017, 2024, 2025, 2026

DISCLAIMER

Any form of copying of the content, information and illustrations from this text book is a punishable offence.

All rights reserved

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copyright holder of this book is the Commissioner of School Education, Amaravati, Andhra Pradesh.

This book has been printed on 70 G.S.M. SS Maplitho Title Page 220 G.S.M. White Art Card

Published by Samagra Shiksha, Government of Andhra Pradesh, Amaravathi.

Printed in India
at the A.P. Govt., Text Book Press
Amaravathi, Andhra Pradesh

AP SCERT

మా తెలుగుతల్లి

– శంకరంబాడి సుందరాచారి



మా తెలుగుతల్లికి మల్లెపూదండ
మా కన్నతల్లికి మంగళారతులు
కడుపులో బంగారు కనుచూపులో కరుణ
చిరునవ్వులో సిరులు దొరలించు మా తల్లి
గలగలా గోదారి కదలిపోతుంటేను
బిరబిరా కృష్ణమ్మ పరుగులిడుతుంటేను
బంగారు పంటలే పండుతాయి
మురిపాల ముత్యాలు దొరలుతాయి
అమరావతీ నగర అపురూప శిల్పాలు
త్యాగయ్య గొంతులో తారాడు నాదాలు
తిక్కయ్య కలములో తియ్యందనాలు
నిత్యమై, నిఖిలమై నిలిచియుండేదాక
రుద్రమ్మ భుజశక్తి, మల్లమ్మ పతిభక్తి
తిమ్మరుసు ధీయుక్తి, కృష్ణరాయల కీర్తి
మా చెవుల రింగుమని మారుమ్రోగేదాక
నీ ఆటలే ఆడుతాం – నీ పాటలే పాడుతాం
జై తెలుగుతల్లీ ! జై తెలుగుతల్లీ! జై తెలుగుతల్లీ!

APSCERT

Printed in India
at the A.P. Govt., Textbook Press,
Amaravati, Andhra Pradesh.

वन्दे मातरम्



वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम् ।

- बंकिंचन्द्र छटर्जी

జాతీయ జెండా రూపకర్త



పింగళి వెంకయ్యగారు 1876 ఆగస్టు 2న కృష్ణా జిల్లాలోని భట్లపెనుమర్రు గ్రామంలో జన్మించారు. భారత స్వాతంత్ర్యోద్యమ కాలంలో దేశానికి తగిన జాతీయ జెండా అవసరాన్ని గుర్తించిన పింగళి వెంకయ్య గారు అనేక నమూనాలను రూపొందించారు. 1921లో విజయవాడలో జరిగిన భారత జాతీయ కాంగ్రెస్ సమావేశంలో మహాత్మాగాంధీకి ఆయన జెండా నమూనాను సమర్పించారు. గాంధీజీ సూచనల మేరకు జెండాలో మార్పులు చేసి, త్రివర్ణ పతాకాన్ని రూపొందించారు.

APSCERT

राष्ट्रियशिक्षानीतिः 2020 (NEP 2020)

भारतस्य नूतना शिक्षानीतिः २०२० समग्रा, सुलभा, विद्यार्थिकेन्द्रीकृतविद्याव्यवस्थां निर्माति च। इयं नीतिः सामर्थ्याधारिताभ्यसनं तथैव अनुभवात्मकविधीन् सुस्पष्टं व्यक्तीकरोति। अनया विद्या आकर्षणीया सार्थका च भवति। जातीयविद्यानीतिः २०२० प्रस्तुत २१ शताब्द्याः नैपुण्यानामुपरि दृष्टिं प्रसारयति।

- विमर्शनात्मकालोचनम्
- सर्जनात्मकता
- समाचारविनिमयक्षमता
- समस्यापरिष्काराश्च अस्यां मुख्यविषयाः।

इयं नीतिः स्वीयजीवनाभ्यसनम् आविष्कारान् सांकेतिकाधारितबोधनाविधीन् प्रोत्साहयति। अस्याः विधेः लक्ष्यम् - सम्मिलितविद्या तथैव भविष्यत्कालानुगुणं विद्याव्यवस्थानिर्माणमेव। इयं नीतिः अत्यन्तवेगेन परिवर्तमाने प्रपञ्चे प्रत्येकं विद्यार्थिनं विजयप्राप्तये शक्तिवन्तं करोति। इयं नीतिः भारतदेशविद्याव्यवस्थायां बृहत् परिवर्तनानयने स्वीयपदानि व्यवस्थापयति।

జాతీయ విద్యా విధానం 2020

జాతీయ విద్యా విధానం 2020 సమగ్రమైనది, సౌలభ్యమైనది మరియు విద్యార్థి-కేంద్రీకృత విద్యా వ్యవస్థను నిర్మిస్తుంది. ఇది సామర్థ్యాధారిత అభ్యసనం మరియు అనుభవాత్మక విధానాలను బలంగా నొక్కి చెబుతుంది, దీనివల్ల విద్య ఆకర్షణీయంగా మరియు అర్థవంతంగా ఉంటుంది. జాతీయ విద్యా విధానం 2020 ప్రస్తుత 21వ శతాబ్దపు నైపుణ్యాలపై దృష్టి సారిస్తుంది.

- విమర్శనాత్మక ఆలోచన
- సృజనాత్మకత
- సమాచారం
- సమస్య పరిష్కారం ముఖ్యమైనవి.

ఇది నిజ జీవిత అభ్యసనం ఆవిష్కరణలు, సాంకేతికతాధారిత బోధనా విధానాలను ప్రోత్సహిస్తుంది. స్థూలంగా, ఈ విధానం సమ్మిళిత విద్యను మరియు భవిష్యత్తుకు సిద్ధమైన విద్యా వ్యవస్థ నిర్మాణమే లక్ష్యంగా పెట్టుకుంది. ఇది వేగంగా మారుతున్న ప్రపంచంలో ప్రతి విద్యార్థి విజయవంతం కావడాన్ని శక్తివంతం చేస్తుంది. ఇది భారతదేశ విద్యా రంగంలో ఒక పెద్ద మార్పు తీసుకొచ్చే దిశగా అడుగులు వేస్తోంది.

APSCERT

राष्ट्रियगीतम्

- रवीन्द्रनाथ् ठागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा
उच्चलजलधितरङ्ग !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव्

भारतदेशः मम मातृभूमिः । भारतीयास्सर्वे मम सहोदराः ।

अहं मम देशं प्रीणामि । सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

AP SCERT

विषयसूची

पाठस्य नाम	प्रक्रिया	मासः	पृष्ठसङ्ख्या
संसिद्धतापाठाः		जून्	x - xiv
१. रक्षत वृक्षान्	गीतम्	जुलै	1-10
२. सर्वे भवन्तु सुखिनः	सम्भाषणम्	आगष्ट्	11-22
३. मैत्री	सुभाषितश्लोकाः	सेप्टेम्बर्	
		अक्टोबर्	23-34
४. बाल्यं खलु विद्यायै	दिनचर्या	नवम्बर्	35-48
५. सन्देशः	स्फोरकपत्रम्	डिसेम्बर्	49-60
६. किं न्याय्यम् ?	कथा	जेनवरि	61-71
पुनश्चरणम्		फिब्रवरि, मार्च्, एप्रिल्	
	अनुबन्धः		
शब्दरूपाणि			72-76
धातुरूपाणि			77-80
पदकोशः			81-83
क्रियापदकोशः			84

- संस्कृतभाषावर्धिनी इत्ययं भागः मूल्याङ्कनाय न उपयोक्तव्यः । केवलं छात्राणां पठनार्थं प्रदत्तः

H7U7M3

Teacher Corner

F2P6C6

Student Corner

© SCERT


अष्टमी कक्ष्या - संस्कृतम्
१. रक्षत वृक्षान्
छात्रेषु प्रकृतिपरिरक्षणस्य विषये जागरूकतायाः विकासः
प्रकृतेः उपयोगकौशलसम्पादनम्
२. सर्वे भवन्तु सुखिनः
छात्रेषु जन्तूनां विषये दयागुणसंवर्धनम्
बुद्धिशक्तेः सत्कार्यकरणे उपयोगः
३. मैत्री
उत्तममित्रस्य लक्षणानि बोधयित्वा छात्रेषु उत्तममैत्रीगुणस्य
ऋजुवर्तनस्य नैतिकमूल्यानां च संवर्धनम्
४. बाल्यं खलु विद्यायै
छात्रेषु "बालकार्मिकान् पाठशालां प्रति आनयामः" इति भावनायाः जागरणम्
दैनन्दिन्याः लेखनाभ्यासस्य वर्धनम्
५. सन्देशः
संस्कृतमासपत्रिकायाः परिचयः
भित्तिपत्रस्य विशेषतायाः ज्ञापनम्
६. किं न्याय्यम्?
मानवजीवनमूल्यानां ज्ञापनम्
विविधसन्दर्भेषु नूतनानुभूतीनां परिचयः
नैतिकमूल्यानां शिक्षणम्

छात्रैः साधयितव्यानि अभ्यसनफलितानि

I. भावावगमनम् - प्रतिस्पन्दनम्

शृण्वन्तु, विचिन्त्य वदन्तु

- ❖ गीतानि, श्लोकाः, सम्भाषणानि, कथाः इत्यादीन् विषयान् श्रुत्वा छात्राः अवगच्छेयुः। तेषां भावान् मातृभाषया वक्तुं शक्नुयुः।
- ❖ संस्कृतेन पृष्टान् प्रश्नान् छात्राः अवगच्छेयुः। तेषां योग्यानि समाधानानि संस्कृतेन वदेयुः।
  ज्ञातान् विषयान् अधिकृत्य संस्कृतेन वदेयुः।
- ❖ लघूनि संस्कृतभाषणानि कर्तुं शक्नुयुः।

पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

- ❖ श्लोकाः, कथाः, गीतानि, सम्भाषणानि, आत्मकथाः, निबन्धाः, लेखाः इत्यादिसंस्कृतविषयान् अवगच्छेयुः धाराप्रवाहतया पठेयुश्च ।
- ❖ पाठितस्य विषयस्य आधारेण दत्तानां प्रश्नानां समाधानानि लिखेयुः। पठनावगमनस्थानि कृत्यानि दोषान् विना कुर्युः।
- ❖ अनुच्छेदगद्यांशानां प्रश्नानां समाधानानि स्वयं लिखत्वा विषयानवगच्छेयुः।

II. भावव्यक्तीकरणम् सर्जनात्मकता

- ❖ ज्ञातान् दृष्टान् श्रुतान् च विषयान् उद्दिश्य स्वप्रतिस्पन्दनं संस्कृतेन लेखितुं शक्नुयुः।
- ❖ बहुसमाधानवतां प्रश्नानां संस्कृतेन उत्तराणि लिखेयुः।
- ❖ आत्मानं तत्तत्सन्दर्भे ऊहित्वा अहं तत्र किं कर्तुं शक्नुयामिति विचिन्त्य प्रत्येकमपि छात्रः संस्कृतेन स्वानुभवं लेखितुं शक्नुयात् ।
- ❖ प्रक्रियापरिवर्तनं कर्तुं शक्नुयुः।
- ❖ कथाः, गीतानि, कविताः स्मरेयुः स्वयं रचयेयुः च।
- ❖ लेखानां लेखनसामर्थ्यं प्राप्नुयुः । चित्राणां लेखनं, तेषां वर्णनं च स्वयं कर्तुं शक्नुयुः।

III. भाषांशाः

पदजालाभिवृद्धिः

- ❖ पाठ्यमानेषु अथवा श्रूयमाणेषु विषयेषु स्थितानां नूतनपदानां सन्दर्भानुगुणम् अर्थं ग्रहीतुं शक्नुयुः।
- ❖ ज्ञातपदानामाधारेण स्वयं वाक्यानि लेखितुं शक्नुयुः।
- ❖ समानार्थकपदानि विरुद्धार्थकपदानि च ज्ञातुं शक्नुयुः।

व्याकरणांशाः

- ❖ भाषाभागान् व्याकरणांशान् च ज्ञातुं शक्नुयुः। विभक्तीः अवगच्छेयुः । तासां प्रामुख्यं च जानीयुः। विना दोषं तासां प्रयोगसामर्थ्यञ्च प्राप्नुयुः ।
- ❖ वाक्यभेदान् जानीयुः। स्वयं प्रयोक्तुं शक्नुयुः।
- ❖ लिङ्गभेदान् विना दोषं प्रयुञ्जीरन् ।
- ❖ कालानुसारं लकाराणां पुरुषाणां च प्रयोगे समर्थाः भवेयुः ।
- ❖ सन्धीनां संयोजने, विघटने, समासानां विग्रहवाक्यानां च प्रयोगे समर्थाः भवेयुः।

AP SCERT

पाठ्यप्रणालिकालक्ष्याणि

भाषा न केवलं शब्दानां व्याकणनियमानां वा समुहः अपि तु भावप्रकटीकरणस्य चिन्तनविकासस्य च प्रमुखं साधनम् ।

१. मौखिकभाषाकौशलानां विकासः ।

१-१ विविधसन्दर्भेषु सरलं सार्थकं च सम्भाषणसामर्थ्यम् ।

१-२ पठितपाठानां मुख्यविषयाणां संक्षेपेण प्रकटीकरणम् ।

१.३ मौखिकप्रदर्शनेषु अतिथि - आह्वानेषु लघुभाषणेषु कक्ष्याचर्चासु च सहभागित्वम् ।

२. पठनं तथा अवबोधनम्

२.१ विविधानां रचनानां (गद्यपद्यकवितादीनाम्) अवबोधनाय कल्पनाशक्तेः ऊह्यमानस्य दर्शनकरणस्य च कौशलानां प्रयोगः ।

२.२ मुख्यविषयाणां ग्रहणं तथा सारांशलेखनम् ।

३. लेखनकौशलस्य विकासः

३.१ वाक्यानां क्रमशः लेखनं शीर्षक - उपशीर्षक - परिच्छेदानां निर्माणकौशलम् ।

३.२ पठितविषयाणां स्वकीयावबोधनेन चिन्तनेन च स्पष्टतया लेखनम् ।

३.३ उपलब्धसूचनाभिः भित्तिपत्राणां निमन्त्रणपत्राणां सरलकवितानां कथानां च लेखनम् ।

३.४ लेखने व्याकरणस्य समुचितवाक्यरचनायाः च प्रयोगः ।

४. शब्दसम्पदः अभिवर्धनम्

४.१ नूतनशब्दानां अर्थचर्चा तथा विविधसाहित्यपठनेन शब्दसम्पदः विकासः ।

४.२ विविधविषयाणां श्रवणेन पठनेन च शब्दज्ञानस्य वर्धनम् ।

५. पठनरुचेः विकासः

५.१ गृहे पठनार्थं ग्रन्थालयात् नियमेन पुस्तकानां स्वीकरणम् ।

५.२ ग्रन्थालये पुस्तकानां पठने आसक्तिप्रदर्शनम् ।

APSCERT

संसिद्धतापाठः

१. प्रथमदिवसाभ्यासः (कोष्ठकपूरणाभ्यासः)

अ		इ			ऊ	
ए			औ			
क			घ			
	छ					
		ङ				
त				न		
		ब				
य		ल				स
ह			ज्ञ			

K5F4I6

APSCERT

द्वितीयदिवसाभ्यासः
(गीताभ्यासः)

सादरं समीयताम्



सादरं समीयताम्
वन्दना विधीयताम्
श्रद्धया स्वमातृभूस्समर्चना विधीयताम् ।

आपदो भवन्तु वा
विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा ।

धीरता न हीयताम्
वीरता विधीयताम्
निर्भयेन चेतसा पदं पुरो निधीयताम् ।

प्राणदायिनी इयम्
त्राणदायिनी इयम्
शक्तिभुक्तिमुक्तिदा सुधाप्रदायिनी इयम् ।

एतदीयवन्दने
सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ।।



APSCERT

(मम दिनचर्या)

मम नाम ..... ।

अहं प्रातःकाले पञ्चवादने उत्तिष्ठामि।

अनन्तरं दन्तधावनं कृत्वा स्नानं च करोमि।

योगाभ्यासं करोमि । प्रकृतिं च पश्यामि ।

क्षीरं पिबामि । सप्तवादने स्नानं करोमि।

अनन्तरं पाठान् पठामि।

अष्टवादने अल्पाहारं खादामि ।

नववादने विद्यालयं गच्छामि।

तत्र पाठान् शृणोमि। टिप्पणीं च लिखामि ।

मध्याह्ने सार्धद्वादशवादने भोजनं करोमि।

सायङ्काले चतुर्वादने पाठशालातः गृहम् आगच्छामि।

क्रीडाङ्गणे क्रीडामि। वृक्षान् जलेन सिञ्चामि ।

अनन्तरं गृहपाठं च लिखामि।

सार्ध-अष्टवादने भोजनं करोमि।

सपादनववादने निद्रामि ।

APSCERT

४.चतुर्थदिवसाभ्यासः
(उच्चारण-लेखनाभ्यासः)

अधः दत्तानि पदानि पठन्तु द्वि अक्षरान्वितपदानि , त्रि - अक्षरान्वितपदानि चित्वा लिखन्तु।

सुन्दरः, लघुः, दीर्घः, स्यूतः, कृशः, नवीनः, प्राचीनः, दुर्बलः, धनवान्, महत्, विशालः, अल्पः, सूक्ष्मः, उन्नतः, कृशः, उत्तमः, स्थूलः, वामनः, , श्वेतः, अन्धः, बधिरः, मूकः, खञ्जः, दुर्बलः, कुरूपः, विद्वान्, मूर्खः, शिक्षितः, क्लान्तः, श्रान्तः, तृषितः, श्रामिकः, दयालुः, क्रोधी, शान्तः, चञ्चलः, नम्रः, अहङ्कारी, उदारः, चतुरः, प्राज्ञः भीतः, श्वेतः, कृष्णः, रक्तः, पीतः, हरितः, नीलः, कपिलः, धूम्रः, मधुरः, आम्लः, लवणः कटुः, कषायः, तिक्तम्, सरलः, कठिनः, मृदुः, कठोरः , स्वच्छः, मलिनः, पूर्णः, रिक्तः, सज्जनः, दयालुः, सत्यवादी, विनीतः, नम्रः, बुद्धिमान्, धीरः, वीरः, शान्तः, क्षमाशीलः, सहृदयः, उदारः, धार्मिकः, विश्वसनीयः, बुद्धिमान्, कर्तव्यनिष्ठः, मूर्खः, अलसः, क्रोधी, दुष्टः, असत्यवादी, लोभी, ईर्ष्यालुः, चञ्चलः, कठोरः, विनीतः, प्रमादी।



उपरितन पदेभ्यः २ अक्षरपदानि , ३ अक्षरपदानि चित्वा लिखन्तु।

२ अक्षरपदानि	३ अक्षरपदानि

AP SCERT



५.पञ्चमदिवसाभ्यासः


अधो दत्तफलचित्रकोष्ठकेषु तेषां फलनामानि लिखन्तु













कदलीफलम्, दाडिमफलम् , सीताफलम् , सेवफलम् ,
बदरीफलम् , मधुरफलम् , द्राक्षाफम् , आम्रफलम् ,
जम्बूफलम् , पनसफलम् , नारिकेलम् , मातुलुङ्गम्

APSCERT

१. रक्षत वृक्षान्

D9G5L4

अभ्यसनफलितानि -

- छात्राः चित्रं वीक्ष्य वृक्षान् प्रति अभिव्यक्तीकुर्वन्ति। (पाठ्यप्रणालीलक्ष्यं - १)
- छात्राः वृक्षाणाम् उपयोगान् ज्ञात्वा तान् रक्षन्ति। (पाठ्यप्रणालीलक्ष्यं - २)
- अनुच्छेदं अनुशृत्य प्रश्नानां समाधानानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ३)
- गीतस्यास्य सारांशम् उक्त्वा वृक्षरक्षणकार्याणि कुर्युः। (पाठ्यप्रणालीलक्ष्यं - ४)

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः


१. चित्रे के के सन्ति ? किं कुर्वन्ति ?

२. वृक्षाः अस्माभिः कथं वर्धनीयाः ?


३. वृक्षाः अस्माकं कृते किं किं यच्छन्ति ?

उद्देश्यम् - छात्रेषु प्रकृतिपरिरक्षणस्य विषये जागरूकतायाः विकासः । प्रकृतेः उपयोगकौशलसम्पानम् ।

रक्षत वृक्षानस्मान्
भवतां रक्षां कर्तुम् ।
गोसम्पत्तिं काननवृद्धिं
प्राप्तुं परिसरशुद्धिम् ।।



।। रक्षत वृक्षान् ।।



फलपुष्पाणां समर्पणेन
प्रकृतिमातरं पूजयामः ।
दारुदलैर्गृहनिर्माणेन
वसतिमभीतिं कल्पयामः ।।



।। रक्षत वृक्षान् ।।



भवता सृष्टं मालिन्यं
निधाय हृदयेऽशेषम् ।
निर्मलसर्गं रचयित्वा
विदधामो बहु सन्तोषम् ॥
॥ रक्षत वृक्षान् ॥



जलमूलं परिपालयामः
वायुमण्डलं पालयामः ।
सदोपकारं वितरामो
न ह्यपकारं चिन्तयामः ॥
॥ रक्षत वृक्षान् ॥

- गुण्डमि गणपय्यहोल्लः



భావాః :

- మిమ్మల్ని రక్షించేటందుకు కారకులమైన మమ్మల్ని మీరు రక్షించండి. గోసంపద పెరుగుటకు, అడవులు అభివృద్ధి చెందుటకు, పరిసరాలు పరిశుభ్రంగా ఉండుటకు అవసరమైన చెట్లమైన మమ్మల్ని రక్షించండి.
- మేము ఫలపుష్పాలను సమర్పించి ప్రకృతి మాతను పూజిస్తాం. కొయ్య దుంగలతో గృహనిర్మాణం చేసి వసతిని కల్పించి మీకు భయం లేకుండా చేస్తాం.
- మీరు చేసే కాలుష్యాన్నంతటినీ ఏ మాత్రం మిగలకుండా హృదయంలో దాచుకొనే మమ్మల్ని మీరు రక్షించండి. మేము కాలుష్యరహితమైన, నిర్మలమైన ప్రకృతిని తయారుచేసి సమాజానికి సంతోషాన్ని కల్పిస్తాం.
- నీటికి ఆధారమైన కొండలు, నదులు, సముద్రాలు, సరస్సులు, చెరువులు మొదలైన అన్నింటిని రక్షిస్తాం. వాతావరణంలో కాలుష్యం లేకుండా చేస్తాం. ఎల్లప్పుడూ ఉపకారమే చేస్తాం. అపకారాన్ని గూర్చి ఆలోచన కూడా చేయం.

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. ''अस्मान् रक्षत'' इति वृक्षाः किमर्थं वदन्ति ?

आ. पाठानुगुणं वृक्षाः मानवानां कृते कथमुपयुक्ताः भवन्ति?

इ. एतत् गीतं सरागं, सभावं गायन्तु।

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु।



वृक्षाः परोपकाराय फलानि यच्छन्ति। वृक्षाः छायां परिकल्पयन्ति। वृक्षाः प्राणवायुं दास्यन्ति। नद्यः परोपकाराय वहन्ति। वर्षाधारेण नद्यः पूर्णाः भवन्ति। गावः मधुरं क्षीरं यच्छन्ति। गोक्षरम् आरोग्याय हितकरम्।

AP SCERT

प्रश्नाः -

१. वृक्षाः किं परिकल्पयन्ति?

२. काः मधुरं क्षीरं यच्छन्ति?

३. के परोपकाराय फलानि यच्छन्ति? ( )

क) वृक्षाः ख) गावः ग) नद्यः

४. किं आरोग्याय हितकरम्? ( )

क) नदीजलम् ख) गोक्षीरम् ग) फलम्

II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तयोः प्रश्नयोः व्यासरूपेण समाधाने लिखन्तु।



१. ''रक्षत वृक्षान्'' गीतस्य सारांशं स्वीयवाक्यैः लिखन्तु।

२. वृक्षाणां रक्षणाय भवन्तः किं कुर्वन्ति ?

आ. अधः दत्तयोः प्रश्नयोः सर्जनात्मकतया समाधाने लिखन्तु।



१. भवन्तः पाठे वृक्षानधिकृत्य पठितवन्तः खलु। तथैव भवतां परिसरे स्थिताः वृक्षाः कथम् उपकुर्वन्ति इति लिखन्तु?

२. वृक्षाणां संरक्षणविषये कानिचन घोषणावाक्यानि लिखन्तु।

III. भाषांशाः

अ. पदजालाभिवृद्धिः



१. अधः दत्तानां रेखाङ्कितपदानां मातृभाषायाम् अर्थान् लिखन्तु

१. वृक्षाः <u>फलानि</u> यच्छन्ति।

२. सर्वे <u>मातरं</u> पूजयन्ति।

३. <u>हृदयं</u> निष्कल्मषं भवेत्।

४. <u>जलं</u> प्राणिनां जीवनाधारम्।

APSCERT

२. अधः दत्तानां रेखाङ्कित पदानां समानार्थकपदानि लिखन्तु



१. वृक्षः अस्मान् रक्षति। तरुः फलानि ददाति

२. जलं दाहं निवारयति। उदकं वृक्षान् रक्षति।

३. काननं सुन्दरं भवति। अरण्यं भयं जनयति।

४. बालः गृहं गच्छति। माता गेहं रक्षति।

३. अधः दत्तानां पदानां विरुद्धार्थकपदानि संयोजयन्तु।

१. उपकारः	अ. विषादम्	( )
२. अशेषम्	आ. स्वल्पम्	( )
३. सन्तोषम्	इ. अपकारः	( )
४. बहु	ई. शेषम्	( )

आ. व्याकरणांशाः



१. अधः दत्तानां पदानां विग्रहवाक्यानि लिखन्तु ।

१. प्रकृतिमातरम् -

२. जलमूलम् -

३. वायुमण्डलम् -

४. गोसम्पत्तिः -

२. अधः दत्तं वाक्यं पठन्तु। विवरणम् अवगच्छन्तु।

- बालकः पाठं पठति।



वाक्ये त्रीणि पदानि सन्ति। प्रथमं कर्तृपदम्। द्वितीयं कर्मपदम्। तृतीयं क्रियापदम्। एतादृशवाक्यं कर्मसहितवाक्यम्।

कर्ता इत्युक्ते कः, का, किम् इति प्रश्नानां समाधानम्।

कर्म इत्युक्ते कम्, काम्, किम् इति प्रश्नानां समाधानम्।

क्रिया इत्युक्ते किं करोति इत्यस्य समाधानम्।

AP SCERT

३. कोष्ठकस्थानि पदानि उपयुज्य वाक्यानि रचयन्तु।

कः? का ?	किम् ?	किं करोति ?
उपाध्यायः, चालकः छात्रा, युवकः, अम्बा,	पूजां, वेदं पाठं, परीक्षां, चित्रं, वाहनम्	बोधयति, रचयति चालयति, करोति, पश्यति, वदति



परियोजनाकार्यम्



शीतकाले लभ्यमानानां पुष्पाणां फलानाञ्च चित्राणि सङ्गृह्य तेषां नामानि लिखित्वा भित्तिपत्रे संलग्नीकुर्वन्तु। तेषां विषये वाक्यद्वयं लिखन्तु ।



स्वीयमूल्याङ्कनम्



१. गीतं रागयुक्तं गातुं शक्नोमि ।	आम् / न
२. गीतं पठित्वा, गीते स्थितानि प्रासाक्षरपदानि ज्ञातुं शक्नोमि ।	आम् / न
३. गीतभावं स्वीयवाक्यैः लेखितुं शक्नोमि ।	आम् / न
४. वृक्षाः अस्मभ्यं किं किं ददतीति अंशं सरलसंस्कृतेन कवितारूपेण लेखितुं शक्नोमि ।	आम् / न

श्रद्धावान् लभते ज्ञानम् ।

APSCERT


वृक्षस्य महत्त्वम्
परोपकारः
भावात्मकसम्बन्धाः
प्रकृतिकृतज्ञता
सर्वप्राणीनाम् आहारप्रदानम्
वैज्ञानिकमहत्त्वम्
मानवसदृश प्राणसहित्वम्
पक्षिजन्तु आवासः
जलसंरक्षणम्
प्राणवायुप्रदानम्

।। संस्कृतसम्भाषणवर्धिनी ।।

वृक्षनामानि

अमरुदवृक्षः	-	జామచెట్టు
चन्दनवृक्षः	-	చందనచెట్టు
सालवृक्षः	-	మద్దిచెట్టు
देवदारुवृक्षः	-	దేవదారుచెట్టు
तालवृक्षः	-	తాటిచెట్టు
पलाशवृक्षः	-	మోదుగచెట్టు
अर्जुनवृक्षः	-	అర్జునచెట్టు
प्लक्षवृक्षः	-	జువ్విచెట్టు
शमीवृक्षः	-	జమ్మిచెట్టు
शाल्मलीवृक्षः	-	బూరుగచెట్టు
आमलकवृक्षः	-	ఉసిరిచెట్టు
अर्कवृक्षः	-	జిల్లేడుచెట్టు
अपामार्गवृक्षः	-	ఉత్తరేణిచెట్టు
कपित्थवृक्षः	-	వెలగచెట్టు
शिग्रुवृक्षः	-	ములగచెట్టు















आम्रवृक्षः	-	మామిడిచెట్టు
नारिकेलवृक्षः	-	కొబ్బరిచెట్టు
निम्बवृक्षः	-	నిమ్మ చెట్టు
अश्वत्थवृक्षः	-	రావిచెట్టు
वटवृक्षः	-	మర్రిచెట్టు
कदलीवृक्षः	-	అరటిచెట్టు
बिल्ववृक्षः	-	మారేడుచెట్టు
जम्बूवृक्षः	-	నేరేడుచెట్టు
बदरीवृक्षः	-	రేగుచెట్టు
पनसवृक्षः	-	పనసచెట్టు
दाडिमवृक्षः	-	దానిమ్మచెట్టు
नारङ्गवृक्षः	-	నారింజచెట్టు
सेववृक्षः	-	యాపిల్‌చెట్టు









APSCERT

धान्यनामानि

१. तण्डुलाः	-	तण्डुलैः अन्नं पच्यते।
२. गोधुमाः	-	गोधूमैः रोटिकाः क्रियन्ते।
३. राजमाषः	-	राजमाषैः व्यंजनं पच्यते।
४. माषाः	-	माषैः माषापूपं क्रियते।
५. मुद्गाः	-	मुद्गाः हरिताः भवन्ति।
६. चणकाः	-	चणकैः वटकाः निर्मीयन्ते।
७. तिलाः	-	तिलेभ्यः तैलं आगच्छति।
८. कुलत्थाः	-	कुलत्थान् गावः खादन्ति।
९. आढकाः	-	आढकैः सूपं पच्यते।





वृक्षभागाः

लता	-	తీగ	तृणम्	-	గడ్డి
निकुञ्जम्	-	పొదరిల్లు	शाखा	-	కొమ్మ
अंकुरः	-	మొలక	कलिका	-	మొగ్గ
शिफा	-	ఊడ	केसरः	-	పుప్పొడి
काण्डः	-	కాండము	कोटरम्	-	చెట్టుతొఱ్ఱ
बीजम्	-	విత్తనము			

२. सर्वे भवन्तु सुखिनः

I2M1N3

अभ्यसनफलितानि -

- छात्राः चित्रं वीक्ष्य जन्तुसामर्थ्यान् प्रति अभिव्यक्तीकुर्वन्ति। (पाठ्यप्रणालीलक्ष्यं - १)
- छात्राः जन्तुपक्षिगुणाः मानवात् श्रेष्ठाः इति जानीयुः। (पाठ्यप्रणालीलक्ष्यं - २)
- छात्राः पाठानुगुणं प्रश्नान् ज्ञात्वा समाधानानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ३)
- जन्तुपक्षिरक्षणाय स्वीयाः आलोचनाः लिखेयुः। (पाठ्यप्रणालीलक्ष्यं - ४)

चित्रं पश्यन्तु,
विचिन्त्य वदन्तु



प्रश्नाः

१. चित्रे के के सन्ति ?

२. चित्रे मनुष्याः जन्तवः च किं कुर्वन्ति?

३. चित्रे मनुष्याणां व्यवहारः कथं भवेत् ?

उद्देश्यम् - छात्रेषु जन्तूनां विषये दयागुणसंवर्धनम् । बुद्धिशक्तेः सत्कार्यकरणे उपयोगः ।



एकस्मिन् समये देवः सर्वानपि प्राणिनः द्रष्टुं तेषां समस्याः ज्ञातुं च इष्टवान् । अतः सः सभाम् एकां संयोज्य तत्र सर्वानपि जन्तून् मानवं च आगन्तुम् आदिष्टवान् ।

(शुकः पिकश्च गीतं गायतः, मयूरः नाट्यं करोति, गर्दभः अश्वश्च इतस्ततः धावनं कुरुतः, गजः गाम्भीर्येण पश्यति, हरिणाः परस्परं भाषमाणाः च सन्ति। सिंहः गर्जति ।)

(तदा द्वारपालकः उद्घोषयति - 'देवदेवः, सर्वेश्वरः, जगदीश्वरः, सृष्टिकर्ता, लयकर्ता सर्वव्यापी परमेश्वरः आगच्छन्नस्ति।' इति)

'देवदेव वर्धतां वर्धताम् अभिवर्धताम्' इति सर्वे वदन्ति ।

(देवः मानवेन सह सभां प्रविशति, सर्वे उत्थाय देवं नमस्कुर्वन्ति । देवः आशीर्वादं कृत्वा उपविशति। मानवः तस्य पार्श्वे उपविशति ।)

देवः - सर्वे कुशलिनः खलु ! मृगराज ! भवान् वदतु !

मृगराजः (सिंहः) - स्वामिन् ! भवतः परिपालने वयं सर्वे कुशलिनः । काले काले आहारं प्राप्नुमः । सुखेन जीवनं कुर्मः । किन्तु.....


देवः - किन्तु.... किम् ?

गजः - महाराज ! वयं सुखेन जीवनं कुर्मः । किन्तु एषः मानवः एव अस्मान् बहुधा पीडयति । तस्य सामर्थ्यं किमस्ति ? किमर्थं भवानपि तस्मै प्राधान्यं ददाति?

अश्वः - किमर्थं भवता तस्य कृते आसनं कल्पितम् ? अस्माकं कृते आसनं किमर्थं नास्ति ?

देवः - भवतां प्रश्नम् अवगतवान् । एतस्मिन् विषये मानवमेव पृच्छन्तु । स एव वदति ।

शुकः - भोः मानव ! मम वाणी यथा मधुरा अस्ति तथा भवतः वाणी अस्ति वा ?




© NCERT




मानवः - सर्वथा नास्ति ।

पिकः - अहं यथा पञ्चमस्वरेण मधुरतया गायामि तथा भवान् गातुं शक्नोति किम् ?


मानवः - न शक्नोमि ।



हरिणः - मम शरीरं पश्यतु । बहु सुन्दरम् अस्ति । एतादृशं सौन्दर्यं भवतः अस्ति किम्?


गर्दभः - भोः ! अहं यथा परिश्रमं करोमि तथा भवान् परिश्रमं कर्तुं शक्नोति वा ?

मानवः - भोः गर्दभवर्य ! भवतः परिश्रमशक्तिः अपि मयि नास्ति । भवतः मूर्खत्वम् अपि मम नास्ति ।



मयूरः - मम नाट्यं दृष्ट्वा सर्वे सन्तुष्टाः भवन्ति । एतादृशं नाट्यकौशलं भवतः अस्ति किम् ?

मानवः - भोः मयूर ! भवतः नर्तनं बहु सुन्दरम् । मम तु एतादृशनर्तनकौशलं नास्ति ।



गजः - भो अल्पमानव ! मम शरीरं पश्यतु । मम बलं पश्यतु । अहम् उन्नतान् वृक्षानपि पातयितुं शक्नोमि ।


मानवः - गजराज! नमोऽस्तु ते ! भवतः बलं लोके कस्यापि नास्ति । अल्पस्य मम कथं स्यात्?

अश्वः - (हेषां कृत्वा) भोः ! मम वेगः अत्र कस्यापि अस्ति वा? भोः मानव ! भवानपि माम् अधिरुह्य एव प्रयाणं करोतीति स्मरतु । भवतः अपेक्षया अहमेव श्रेष्ठः ।



देवः - भोः मृगराज ! भवतः अभिप्रायं वदतु ?

सिंहः - देव ! वक्तुं किमस्ति? अस्मासु विद्यमानेषु गुणेषु एकः अपि गुणः अस्य मानवस्य नास्ति । एतत् सत्यं स्वयं मानवः एव अङ्गीकृतवान् । अतः एषः मानवः उन्नतस्थाने उपवेष्टुम् अनर्हः ।



मानवः - भो मृगराज ! भवता उक्तं सत्यमेव । भवत्सु इव सामर्थ्यं मयि नास्ति । किन्तु मम बुद्धिशक्तिः अस्ति । तेनाहं सर्वानपि स्ववशे स्थापयामि । सर्वं साधयाम्यपि ।

देवः - इदानीं ज्ञातं खलु ! मानवः बुद्धिशक्त्या सर्वेषामपेक्षया श्रेष्ठः । अतः मम पार्श्वे उपविष्टवान् ।

APSCERT

गजः - सत्यं वयमङ्गीकुर्मः । किन्तु एषः स्वबुद्धिशक्त्या भूलोकं नरकं कुर्वन्नस्ति । अस्मान् सर्वानपि पीडयन् अस्ति ।

हरिणः - देव ! तस्मै कृपया सद्बुद्धिं ददातु । तेन वयं सर्वे सुखेन जीवितुं शक्नुमः ।

देवः - अस्तु । तथास्तु । मानवस्य बुद्धिं सन्मार्गे प्रवर्तयिष्यामि ।

मानवः- ''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ।।''
।। ॐ शान्तिः शान्तिः शान्तिः ।।

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु



अ. के के पशवः कुत्र कुत्र वसन्तीति वदन्तु ?

आ. पाठगतानां पोष्यपशूनां, क्रूरमृगाणां च नामानि वदन्तु।

इ. एतस्य पाठस्य 'सर्वे भवन्तु सुखिनः' इति शीर्षिका समीचीना वा ? कथम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु।

अरण्ये मृगाः निवसन्ति। अरण्ये वृक्षाः पक्षिणां कृते आवासं यच्छन्ति। सिंहाः व्याघ्राः च अरण्यस्य रक्षणं कुर्वन्ति। हरिणाः इतस्ततः धावनं कुर्वन्ति। यत्र अरण्यानि भवन्ति तत्रैव मेघाः वर्षन्ति। मयूरः वर्षसमये नृत्यं करोति। मयूरः भारतस्य राष्ट्रपक्षी अस्ति।



अ) अरण्ये के निवसन्ति?

आ) के के अरण्यस्य रक्षणं कुर्वन्ति?

इ) ..... भारतस्य राष्ट्रपक्षी अस्ति। ( )

क) पिकः ख) भ्रमरः ग) मयूरः

ई) यत्र अरण्यानि भवन्ति तत्रैव ..... वर्षन्ति। ( )

क) नद्यः ख) मेघाः ग) तडागाः

ARSCERT

आ) अधः दत्ते परिच्छेदे दत्तानां चित्राणां स्थाने तेषां नामानि लिखित्वा पठन्तु ।

बृन्दावनी पाठशालातः आगच्छन्ती वृक्षं पश्यति । वृक्षस्य शाखायां  ..... उपविष्टवान्। वृक्षस्य अधः  ..... विश्रान्तिं स्वीकरोति । मार्गे  ..... आगच्छति । गृहस्य पुरतः  ..... अस्ति। भित्तौ  ..... म्याव् म्याव् वदति।

II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तयोः प्रश्नयोः व्यासरूपेण समाधाने लिखन्तु।

१. "सर्वे भवन्तु सुखिनः" इति पाठ्यभाग सारांशं स्वीयवाक्यैः लिखन्तु।



२. पाठे जन्तवः देवं प्रति स्वबाधाः उक्तवन्तः खलु ! तेषां बाधानिवारणाय भवान् कान् उपायान् वदति ?

आ. अधः दत्तयोः प्रश्नयोः सर्जनात्मकतया समाधाने लिखन्तु।

१. देवस्य स्थाने भवान् भवति चेत् किं वदति ?



२. पक्षिणां रक्षणार्थं किं करणीयमिति पञ्चवाक्यानि लिखन्तु।

APSCERT

III. भाषांशाः

१. पदजालाभिवृद्धिः



अ. प्राणिनः कार्यं ज्ञात्वा योजयन्तु । ततः वाक्यरूपेण लिखन्तु ।

क	ख
	भारं वहति ।
	मधुरं वदति ।
	सुन्दरं नृत्यति ।
	वेगेन धावति ।
	पञ्चमस्वरे कूजति ।



आ. समानार्थकपदानां योजनं कुर्वन्तु।

१. गजः	( )	अ) मृगः
२. सिंहः	( )	आ) खरः
३. हरिणः	( )	इ) हस्ती
४. अश्वः	( )	ई) केकी
५. मयूरः	( )	उ) केसरी
६. गर्दभः	( )	ऊ) तुरगः

AP SCERT

इ. रेखाङ्कितपदानां विरुद्धार्थकपदानि लिखन्तु।

अ) सर्वे सुखम् इच्छन्ति। दुःखं न इच्छन्ति।

आ) अध्यापकः प्रश्नं पृच्छति। छात्राः उत्तरं दास्यन्ति।

इ) सर्वैः सत्यं वक्तव्यम्। कदापि असत्यं न वक्तव्यम्।

ई) धर्मस्य प्राधान्यम् अस्ति। अधर्मस्य अप्राधान्यम् अस्ति।

१. सुखम् x..... ३. सत्यं x .....

२. प्रश्नः x ..... ४. प्राधान्यम् x .....

2. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठित्वा रेखाङ्कितानां पदानाम् अर्थान् अवगच्छन्तु ।

अ. विद्युत् नास्ति अतः व्यजनं न भ्रमति ।

आ. अद्य पर्वदिनम् अतः पाठशालायाः विरामः अस्ति ।

अत्र 'अतः' इति पदं कारणसूचकम् । एतत् अव्ययम् ।

२. अतः इति अव्ययम् उपयुज्य कार्यकारणभावं सूचयन्तः वाक्यानि लिखन्तु।

अ. इन्धनं - वाहनम्

आ. वृष्टिः - छत्रम्

इ. शिरोवेदना - औषधम्

ई. क्षुधा - कदलीफलम्

३. अधः दत्तानि गुणसन्धेः उदाहरणानि पठन्तु । अवगच्छन्तु ।

अ + इ = ए	अ + ई = ए
आ + इ = ए	आ + ई = ए
अ + उ = ओ	अ + ऊ = ओ
आ + उ = ओ	आ + ऊ = ओ
अ + ऋ = अर्	अ + ॠ = अर्

AP SCERT

अ.	महा	+	इन्द्रः	=	महेन्द्रः
आ.	परम	+	ईश्वरः	=	परमेश्वरः
इ	गण	+	ईशः	=	गणेशः
ई	सूर्य	+	उदयः	=	सूर्योदयः
उ.	महा	+	ऊर्मिः	=	महोर्मिः
ऊ.	देव	+	ऋषिः	=	देवर्षिः



परियजनाकार्यम्

१. प्रवासि(వలస)पक्षिणां नामानि ज्ञात्वा तेषां चित्राणि सङ्गृह्य भित्तिपत्रे लेपयित्वा तान्यधिकृत्य लिखन्तु ।

२. जन्तूनां रक्षणार्थं विशेषप्रयत्नं कुर्वतीः ''ब्लूक्रास्'' सदृशीः संस्थाः गत्वा तत्र विषयसङ्ग्रहणं कृत्वा निवेदिकां(**Report**) विरच्य प्रदर्शयन्तु ।



स्वीयमूल्याङ्कनम्



१.	पाठस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि ।	आम् / न
२.	पाठं धारालतया पठितुं शक्नोमि ।	आम् / न
३.	वाक्यानि सम्यक्तया लेखितुं शक्नोमि ।	आम् / न
४.	सर्वजीवेषु समभावनां प्रकटयितुं शक्नोमि ।	आम् / न
५.	पाठ्यांशम् अभिनेतुं शक्नोमि ।	आम् / न

अभ्यासो हि कर्मणां कौशलमावहति ।


APSCERT

।। संस्कृतभाषावर्धिनी ।।

उद्यानवनं पश्यन्तु । पुष्पाणां नामानि संस्कृते जानन्तु



अधः कोष्टकेषु पुष्पाणां संस्कृतनामानि लिखन्तु



१. जपापुष्पं (మందార) सुन्दरम् अस्ति

२. मल्लिकापुष्पं (మల్లె) श्वेतम् अस्ति

३. चम्पकपुष्पं (సంపెంగ) सुगन्धम् अस्ति

४. कमलं (పద్మం) सुन्दरम् अस्ति

५. कुवलयं (కలువ) तटे विकसति

६. पाटलं (గులాబి) रक्तवर्णे अस्ति

७. सूर्यकान्तपुष्पं (ప్రొద్దుతిరుగుడు) विकसति

८. पारिजातपुष्पं (పారిజాతం) सुगन्धभरितम्

९. सेवन्तिकापुष्पम् (చేమంతి) अस्ति

१०. कर्णिकारः (కొండగోగు) सुन्दरमस्ति

११. नन्दिवर्धनम् (నందివర్ధనము) उद्याने अस्ति

१२. नलिनम् (లిల్లీ) मालायाम् अस्ति

१३. गुच्छपुष्पम् (బంతి) पुष्पकुण्डे अस्ति

१४. शिरीषपुष्पम् (దిరిసెన) श्वेतम् अस्ति

१५. कुन्दं पुष्पम् (మల్లె) महिला धरति


१६. नवमालिका (విరజాజి) विकसति

१७. जातीपुष्पं (సన్నజాజి) लतायां विकसति

१८. शङ्खं पुष्पं (శంఖ) शिवाय अर्पयति

APSCERT





భారతీయవిజ్ఞానమంజరీ

పాణినిः (Panini)

పాణినిः నంస్కృతభాషాయాः మహాన్ వ్యాకరణశాస్త్రజ్ఞः. తేన 'అష్టాధ్యాయీ' ఇతి విశ్వప్రసిద్ధः గ్రంథः రచితः. తస్య వ్యాకరణనియమాः ఆధునిక భాషావిజ్ఞానస్య (Linguistics) తథా సంగణకశాస్త్రస్య (Computer Science) కృతే అపి ఆధారభూతాः సంతి.

ARSCERT

३. मैत्री

L1S8U2

अभ्यसनफलितानि -

- छात्राः चित्रं वीक्ष्य स्नेहमुद्दिश्य अभिव्यक्तीकुर्वन्ति। (पाठ्यप्रणालीलक्ष्यं - १)
- छात्राः श्लोकान् पठित्वा तदर्थान् विज्ञाय स्नेहविषयान् वक्तुं शक्नुवन्ति। (पाठ्यप्रणालीलक्ष्यं - ३)
- छात्राः सरागं, सभावं श्लोकान् उक्त्वा भावान् जानीयुः। (पाठ्यप्रणालीलक्ष्यं - २)
- मैत्रीलक्षणानि उक्त्वा स्वीयानि समाधानानि लिखेयुः। (पाठ्यप्रणालीलक्ष्यं - ४)

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः


१. चित्रे के के सन्ति ?
२. छात्राः किं धृतवन्तः ? किमर्थम् ?
३. चित्रं दृष्ट्वा किं ज्ञातवान् ?

उद्देश्यम्

उत्तममित्रस्य लक्षणानि बोधयित्वा छात्रेषु उत्तममैत्रीगुणस्य नैतिकमूल्यानां च संवर्धनम्।

१. करावि व शरीरस्य
नेत्रयोरि व पक्ष्मणी ।
अविचार्य प्रियं कुर्यात्
तन्मित्रं मित्रमुच्यते ।।

శరీరమునకు చేతులమాదిరిగా, కన్నులకు కనురెప్పల మాదిరిగా, నాకు హాని కలుగుతుందేమోనని ఆలోచించకుండా, ప్రతిఫలం ఆశించకుండా ఎవడు మేలుచేస్తాడో అటువంటి మిత్రుడే నిజమైన మిత్రుడు.



२. उपकर्तुं प्रियं वक्तुं
कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं
केनेन्दुः शिशिरीकृतः ।।

ఉపకారం చేయడం, ప్రియంగా మాట్లాడడం, స్వచ్ఛమైన స్నేహాన్ని అందించడం ఇవన్నీ సజ్జనులకు సహజసిద్ధమైనవి. చంద్రునికి చల్లదనాన్ని ఇవ్వమని ఎవరూ చెప్పలేదు కదా! చల్లగా ఉండడమే అతని స్వభావం.



३. न कश्चित् कस्यचिन्मित्रं
न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जायन्ते
मित्राणि रिपवस्तथा ॥

ఏ ఒక్కరూ ఏ ఒక్కరికీ స్నేహితుడూ కాదు, శత్రువు కూడా కాదు. స్నేహితులైనా, శత్రువులైనా కారణాల చేతనే (పరిస్థితులవల్లే) ఏర్పడుతారు.



४.ददाति प्रतिगृह्णाति
गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव
षड्विधं मित्रलक्षणम् ॥

మంచి మిత్రునికి ఉండే ఆరు లక్షణాలను నీతిశాస్త్రకారులు ఈ విధంగా తెలిపారు. 1) మంచిమిత్రుడు మిత్రునికి కావలసినవి ఇస్తాడు. 2) తనకు కావలసినవి మొహమాటం లేకుండా తీసుకుంటాడు. 3) తన రహస్యాలను చెబుతాడు. 4) మిత్రుని రహస్యాలను అడుగుతాడు. 5) మిత్రుని వద్ద సంకోచం లేకుండా తింటాడు. 6) మిత్రునికి ఆనందంగా తినిపిస్తాడు.




५. दर्शने स्पर्शने वापि
श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं
स स्नेह इति कथ्यते ॥

చూడడం, తాకడం, వినడం, మాట్లాడడం మొదలైనవి చేసేటప్పుడు ఎక్కడ మనసు ఆనందపడుతుందో అక్కడే నిజమైన స్నేహముందని పండితులంటారు.



६. पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

మంచిమిత్రుడు పాపం చేయకుండా నివారిస్తాడు. మంచిపనులు చేయమని ప్రోత్సహిస్తాడు. మిత్రుని రహస్యాలను దాచి, మంచి విషయాలనే అందరితో చెబుతాడు. ఆపదసమయంలో వదలకుండా వెంట ఉంటాడు. అవసరమైన సమయంలో కావలసింది ఇస్తాడు. ఇలా ఉండటం మంచిస్నేహితుని లక్షణమని సజ్జనులు అంటారు.



APSCERT



'विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन । स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥'

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु



अ) पाठगतान् श्लोकान् भावयुक्ततया गायन्तु ।

आ) एतस्य पाठ्यांशस्य "मैत्री" इति शीर्षिका उचिता वा ? कथम् ?

इ) भवतः स्नेहितेषु उत्तमस्नेहितः कः ? तस्य उत्तमगुणाः के ?

II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु।

मित्रं धर्मम् आचरति। सुहृत् पापात् निवारयति। सदा हितं बोधयति। आपत्काले धनं ददाति। मित्राय उपकारं करोति। सुहृत् सन्मार्गे प्रवर्तयति। मित्रं गुह्यं निगूहति। मित्रस्य गुणान् प्रकटीकरोति। कुचेलः कृष्णस्य मित्रम्। रामः वालिं हत्वा, मित्राय सुग्रीवाय पुनः राज्यं प्राप्तुम् उपकोति।

अ) मित्रं किम् आचरति?

आ) मित्रं कस्मात् निवारयति?

इ) मित्रं ..... निगूहति। ( )

क) हितं ख) गुह्यं ग) धर्मं

ई) कुचेलः ..... मित्रम्। ( )

क) कृष्णस्य ख) रामस्य ग) भीमस्य

आ. पाठस्य आधारेण अधः दत्तानि वाक्यानि समीकृत्य लिखन्तु ।

अ. अपकारः, अप्रियसम्भाषणम्, कृत्रिमस्नेहः - एतानि सज्ञनानां लक्षणानि ।
आ. यः आलोच्य हितं करोति स एव मित्रम् ।
इ. यं दृष्ट्वा, स्पृष्ट्वा, उक्त्वा हृदयं न द्रवति स एव मित्रम् ।
ई. मानवाः परस्परम् अकारणेन मित्राणि भवन्ति ।
उ. सन्मित्रं हितान्निवारयति, पापाय योजयते ।

II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तानां प्रश्नानां समाधानानि व्यासरूपेण लिखन्तु।



१. "मैत्री" इति पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु।
२. मित्रस्य लक्षणानि कति? तानि कानि ?
३. द्वयोः मध्ये मैत्री कथं जायते ? कारणानि लिखन्तु ।

आ. अधः दत्तानां प्रश्नानां समाधानानि सर्जनात्मकतया लिखन्तु।



१. "षड्विधं मित्रलक्षणम्" इति मित्रस्य षट् लक्षणानि ज्ञातवन्तः खलु। भवन्तः मित्रस्य इतोऽपि षट् लक्षणानि लिखन्तु।
२. भवान् कीदृशैः सह मैत्रीं करोति?
३. मित्रस्य औन्नत्यम् अधिकृत्य मित्राय पत्रं लिखन्तु।

III. भाषांशाः

अ) पदजालाभिवृद्धिः

१. रेखाङ्कितपदानां समानार्थकपदानि लिखन्तु।

अ. सर्वेन्द्रियाणां <u>नयनं</u> प्रधानम्। **नयनम्** - .....
आ. कृष्णस्य <u>रिपुः</u>, तस्य मातुलः कंसः। **रिपुः** - .....
इ. <u>शरीरम्</u> आद्यं खलु धर्मसाधनम्। **शरीरम्** - .....

APSCERT

ई. **काले** वर्षति पर्जन्यः। **काले** - .....

उ. **संतः** परोपकाराय यतते। **संतः** - .....

ऊ. **इन्दुः** परमेश्वरस्य शिरसि विराजते। **इन्दुः** - .....

२. रेखाङ्कितानां पदानां विरुद्धार्थकपदानि मञ्जूषातः चयनं कृत्वा लिखन्तु।

कृत्रिमम्, अप्रियं, अविचार्य, शत्रुः, स्वीकुर्वन्ति, अहितं।



अ) सुधामा श्रीकृष्णस्य **मित्रम्** । **मित्रम्** - .....

आ) सर्वाणि कार्याणि **विचार्य** करणीयानि । **विचार्य** - .....

इ) मेघाः पृथिव्यै जलं **यच्छन्ति** । **यच्छन्ति** - .....

ई) सज्जनः समाजाय **हितं** करोति । **हितं** - .....

उ) **प्रियं** च नानृतं ब्रूयात् । **प्रियं** - .....

ऊ) सज्जनानां मैत्री **सहजम्**। **सहजम्** - .....

३. उदाहरणस्य साहाय्येन वाक्येषु पदानां क्रमं लिखन्तु ।



उदा ।। पापात् निवारयति सन्मित्रम् ।


सन्मित्रं पापात् निवारयति ।

अ. हिताय योजयते सन्मित्रम् ।

आ. गुणान् सन्मित्रं प्रकटीकरोति ।

इ. कुर्यात् प्रियं मित्रम् अविचार्य ।

४. चक्रस्य साहाय्येन मित्रं किं किं करोतीति वदन्तु लिखन्तु च ।



षड्विधं मित्रलक्षणम्

१. .....

२. .....

३. .....

४. .....

५. .....

६. .....

AP SCERT

५. 'तुमुन्' प्रत्ययान्तपदम् उपयुज्य वाक्यसंयोजनं कृत्वा लिखन्तु ।



उदा - छात्रः विद्यालयं गच्छति । पाठं पठति ।
छात्रः पाठं पठितुं विद्यालयं गच्छति ।

अ. यात्रिकः नदीं गच्छति । स्नानं करोति ।

आ. वाणी कदलीफलं स्वीकरोति । खादति ।

इ. भास्करः पुस्तकं क्रीणाति । पठति ।

ई. पावनी कवितां शृणोति । लिखति ।

उ. प्रणवः श्लोकं लिखति । गायति ।

आ) व्याकरणांशाः



१. उदाहरणानुसारं पदविभागं कुर्वन्तु ।

उदा - स्नेहमकृत्रिमम् - स्नेहम् + अकृत्रिमम्

अ. गुह्यमाख्याति = ... + ...

आ. मित्रमुच्यते = ... + ...

इ. लक्षणमिदम् = ... + ...

ई. छायामाश्रितः = ... + ...

उ. स्वयमेव = ... + ...

२. उदाहरणानुसारं पदानि योजयन्तु ।

उदा - एवम् + एव = एवमेव

अ. इदम् + अत्र = ...

आ. त्वम् + अपि = ...

इ. कथाम् + उपदिशति = ...

ई. सर्वम् + ऐश्वर्यम् = ...

३. पदानि विघटयन्तु ।

अ. सन्मित्रम् = ... + ...

आ. षड्विधम् = ... + ...

इ. केनेन्दुः = ... + ...

ई. नेत्रयोरिव = ... + ...

AP SCERT

४. वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।



अ. किशोरः अम्बायाः वचनं श्रुत्वा स्नानार्थं गतवान् ।

आ. गोपालः स्नानं कृत्वा पूजां करोति ।

इ. गौतमः क्रीडित्वा पाठं पठति ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि 'क्त्वा' प्रत्ययान्तानि ।

५. वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।

अ. सिद्धार्थः उपविश्य पाठं पठति ।

आ. वाणी आगत्य परीक्षां लिखति ।

इ. पितामही उपनेत्रं विस्मृत्य गतवती ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि ल्यप् प्रत्ययान्तानि ।

६. अधः आवरणे दत्तैः क्रियापदैः सह ल्यप्-क्त्वा प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयन्तु ।

नन्दकिशोरः प्रातः.....(उत्तिष्ठति) दन्तधावनं करोति । स्नानं.....(करोति) देवं पूजयति । अल्पाहारं करोति । ततः विद्यालयं.....(गच्छति) कक्ष्यायाम्.....(उपविशति) पाठान् शृणोति ।

७. अधः क्रियापदानि सन्ति । मित्राणाम् उपाध्यायस्य वा साहाय्येन तैः क्त्वा प्रत्ययं, ल्यप् प्रत्ययं वा योजयित्वा लिखन्तु ।

उदा - क्त्वा - धावति - धावित्वा

ल्यप् - प्रक्षालयति - प्रक्षाल्य



१.	पिबति	६.	विचारयति
२.	शृणोति	७.	विस्मरति
३.	लिखति	८.	आनयति
४.	पठति	९.	आगच्छति
५.	नमति	१०.	विलिखति



परियोजनाकार्यम्

मैत्रीसम्बद्धान् श्लोकान् सङ्गृह्य, लिखित्वा भित्तिपत्रे संलग्नीकुर्वन्तु । तेषां भावान् च लिखित्वा कक्ष्यायां श्रावयन्तु ।


AP SCERT

स्नेहगुणाः



TP SCERT

భారతీయవిజ్ఞానమంజరీ



యోగేనచిత్తస్య పదేన వాచాం
మలం శరీరస్య చ వైద్యకేన।
యోఽపాకరోత్ తం ప్రవరం ముునీనాం
పతంజలిం ప్రాంజలి ప్రాణతోస్మి॥

పతంజలిః (Patanjali)

మహర్షిః పతంజలిః "యోగశాస్త్రస్య పితామహః".

తేన 'యోగసూత్రాణి' రచితాని.

శారీరిక మానసిక స్వాస్థ్యాయ యోగస్య మహత్త్వం తేన ప్రతిపాదితమ్.

తథా ఏవ వ్యాకరణే 'మహాభాష్యమ్', ఆయుర్వేదే అపి తస్య యోగదానం అతులితమ్.

APSCERT

।। संस्कृतभाषावर्धिनी ।।



माता	(అమ్మ)
पिता	(నాన్న)
अग्रजः	(అన్నయ్య)
अग्रजा	(అక్క)
अनुजः	(తమ్ముడు)
अनुजा	(చెల్లెలు)
मातामही	(అమ్మమ్మ)
मातामहः	(తాతయ్య)
पितामहः	(తాత)
पितामही	(మామ్మ)

मातुलः	(మేనమామ)
मातुलानी	(మేనత్త)
पितृव्यः	(బాబాయి)
पितृव्या	(పిన్ని)
श्वशुरः	(మామగారు)
श्वश्रूः	(అత్తగారు)
जामाता	(అల్లుడు)
स्नुषा	(కోడలు)
पितृष्वसा	(మేనత్త)





स्वीयमूल्याङ्कनम्



१. श्लोकान् रागयुक्ततया / भावयुक्ततया पठितुं शक्नोमि ।	आम् / न
२. पाठस्य आधारेण वाक्यानि संस्कृतीकर्तुं शक्नोमि ।	आम् / न
३. पाठसारं स्वीयवाक्यैः लेखितुं शक्नोमि ।	आम् / न

सत्यं वद । धर्मं चर ।

AP SCERT

४. बाल्यं खलु विद्यायै

W4W6R8

अभ्यसनफलितानि -

- छात्राः चित्रं वीक्ष्य विद्याप्रयोजनानि अभिव्यक्तीकुर्वन्ति। (पाठ्यप्रणालीलक्ष्यं - १)
- दिनचर्यालेखनं ज्ञात्वा संघटनाम् अक्षरपदवाक्ययुक्तां जानीयुः। (पाठ्यप्रणालीलक्ष्यं - २)
- बालकार्मिकसमस्याः ज्ञात्वा परिष्कारोपायान् वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ४)
- अनुच्छेदानुगुणं समाधानानि लिखेयुः। (पाठ्यप्रणालीलक्ष्यं - ३)

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः

१. चित्रे के के सन्ति ?

२. चित्रे बालाः किं कुर्वन्ति?

३. बालानां तादृशकार्याणि समुचितानि वा ?

उद्देश्यम् - १. छात्रेषु ''बालकार्मिकान् पाठशालां प्रति आनयामः'' इति भावनायाः जागरणम् ।
२. दैनन्दिन्याः लेखनाभ्यासस्य वर्धनम् ।



किशोरः नगरपालकसंस्थायाः गान्धीजी उन्नतपाठ-शालायाम् अष्टमकक्ष्यायां पठति। तस्य जनकः वस्त्रापणे लिपिकः। किशोरस्य **''दिनचर्यालेखनाभ्यासः''** अस्ति। तस्य दैनन्दिन्याम् अत्यन्तम् उत्कण्ठभरितं दिनद्वयम् अधिकृत्य पठामः वा?


'कौसल्यासुप्रजा राम! पूर्वा सन्ध्या प्रवर्तते' ..... देवालयस्य ध्वनिविस्तारकतः सुप्रभातस्तोत्रं शृण्वन् अहं निद्रातः उत्थितवान्। कालकृत्यानि समाप्य पूर्वमेव सिद्धेन जनकेन सह प्रातश्चलनार्थं गच्छन् जनकस्य द्विचक्रिकां दृष्टवान्।

द्विचक्रिकायाः दर्शनेन मणिकण्ठः स्मरणे आगतः। मणिकण्ठः अस्माकं शालायामेव पञ्चमकक्ष्यापर्यन्तं पठितवान्। निर्धनः तस्य जनकः त्रयाणां पुत्राणां पालनं कष्टकरमिति चिन्तयित्वा तं द्विचक्रिकाणां समीकरागारे कार्यार्थं नियुक्तवान्।



अहं जनकेन सह वेगेन पुरतः चलामि स्म। किन्तु मम चिन्तनानि पृष्ठतः गच्छन्ति स्म। गृहागमनानन्तरम् अम्बा क्षीरं दत्तवती। अहम् अन्यमनस्कः सन् पीतवान्। स्नानं च कृतवान्। पूजार्थमुपविष्टवान्। मम मनसि देवस्य स्मरणं नास्ति। नेत्रे निमील्य मणिकण्ठमेव स्मरामि स्म।

AP SCERT



''किमर्थं सः पठशालां त्यक्तवान् ?''

''समीकरागारं किमर्थं प्रविष्टवान् ?''

ततः अहम् अवशिष्टं गृहकार्यं समाप्य अल्पाहारार्थमुपविष्टवान् । हस्तः स्थालिकायाम् अस्ति । मनस्तु तत्रैवास्ति ।


मणिकण्ठः उत्तमबालकः मेधावी च । सः पठति चेत् अवश्यमेव उन्नतस्थानं प्राप्नोति । अहं गत्वा वदामि चेत् तस्य जनकः न शृणुयात् इति मम संशयः ।

''स्थालिकायां हस्तं निधाय किं चिन्तयति?'' शीघ्रं खादतु उक्तवती पितामही जपमालां वर्तयन्ती ।

ततः पाठशालां प्रति गमनसमये जनकः पृष्टवान् ''वत्स किं चिन्तयति ?'' जनकस्य स्वरगतं प्रेम मकरन्दादपि मधुरमासीत् ।

''उत्तमविद्यार्थी मणिकण्ठः पाठशालां त्यक्त्वा बालकार्मिकः जातः । सः रक्षणीयः । तस्य जनकेन सह भवान् भाषणं करोतु'' इति अहं जनकं बहुधा प्रार्थितवान्। जनकस्तु मौनेन शिरः कम्पयन् ''अस्तु प्रयत्नं कुर्मः'' इत्यवदत् । समाधानं लघु अपि तस्य पृष्ठतः कमपि निर्णयं लक्षितवानहम् । ततोऽहं पाठशालां प्रविश्य दैनन्दिनव्यवहारेषु व्यग्रः अभवम् । शनिवासरं भानुवासरं च एवमेव कष्टेन यापितवान् ।

अद्य सोमवासरः । प्रतिदिनमिव प्रातरुत्थाय प्रातश्चलन योगाभ्यासादिकार्याणि समाप्य पाठशालां प्रति प्रस्थितः । जनकः द्विचक्रिकां चालयति स्म ।



AP SCERT



अहं तु पृष्ठतः उपविश्य किमपि चिन्तयामि स्म । मार्गे द्विचक्रिकागारे मणिकण्ठः न दृष्टः । सः कुत्र गतवान् ? किम् अभवत् तस्य ? एतत् कार्यं त्यक्त्वा अन्यकार्ये प्रविष्टवान् वा ? किं कुर्मः ''ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते'' इति पितामही सर्वदा वदति इत्यादि चिन्तयन्नेव पाठशालां प्रविष्टवान् ।

आश्चर्यम् । तत्र पुरतः मणिकण्ठः तस्य जनकेन सह आगतवान् । तस्य स्कन्धे पुस्तकस्यूतः मुखे आनन्दः च दृश्यते । तस्य जनकः मम जनकस्य समीपमागत्य ''नमस्ते महोदय ! भवान् मम गृहमागत्य सकाले उत्तमविचारान् उक्तवान् । तेन प्रेरितः अहं मम पुत्रं पाठशालां प्रवेशितवान्'' इत्यादिकं बहु वदन् आसीत्। मणिकण्ठस्तु मौनेन मामेव पश्यति स्म । तस्य दृष्टौ कृतज्ञता । मम मनसि सफलता । तस्मिन् क्षणे अहं महान्तम् आनन्दम् अनुभूतवान् । तादृशमानन्दं जीवने कदापि नानुभूतवान् । तादृशः एव आनन्दः मम पुनरावश्यकः ।



APSCERT

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु



अ. दिनचर्यां कः लिखितवान् ? किमिति लिखितवान् ?

आ. "बालाः सर्वे पाठशालां गच्छेयुः । केऽपि बालाः बालकार्मिकाः न भवेयुः।" एतद्विषये भवतः अभिप्रायः कः ?

इ. भवान् कदापि दैनन्दिनीं लिखितवान् वा ? लिखति चेत् कं विषयमधिकृत्य लिखति ?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।



मेघना प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठति । सा तस्याः जनकेन सह व्यायामं करोति । सार्धषड्वादने स्नानं करोति । सप्तवादने पूजां कृत्वा सार्धसप्तवादनतः सार्धाष्टवादनपर्यन्तं पाठ्यांशान् पठति । सार्धाष्टवादने अल्पाहारं स्वीकृत्य पाठशालां गच्छति । सार्धनववादनतः सायं विंशत्यूनपञ्चवादनपर्यन्तं पाठशालायां भवति । सा पञ्चवादने गृहमागच्छति, सपादपञ्चवादनतः षड्वादनपर्यन्तं क्रीडति । सार्धषड्वादनतः सप्तवादनपर्यन्तं पूजां करोति । सप्तवादनतः नववादनपर्यन्तं पठति । नववादने भोजनं करोति। दशवादनतः प्रातः पञ्चवादनपर्यन्तं निद्रां करोति ।

अ. मेघना प्रतिदिनं कदा उत्तिष्ठति ? .....

आ. मेघना अल्पाहारात् पूर्वं किं किं करोति ? .....

इ. मेघनायाः पाठशालासमयः कः ? .....


ई. मेघना कदा क्रीडति ? .....

उ. मेघना कदा निद्राति ? .....

AP SCERT

II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तानां प्रश्नानां व्यासरूपेण समाधानानि लिखन्तु।



१. बाल्यं खलु विद्यायै इति पाठ्यभागसारांशं स्वीयवाक्यैः लिखन्तु।

२. किशोरः प्रतिदिनं प्रातः किं करोति?

३. किशोरस्य जनकः मणिकण्ठस्य जनकं किमुक्तवान् स्यात् इति ऊहित्वा लिखन्तु।

आ. अधः दत्तानां प्रश्नानां सर्जनात्मकतया समाधानानि लिखन्तु।



१. सर्वकारीयपाठशालासु छात्रेभ्यः कानि कानि आनुकूल्यानि सन्ति ?

२. किशोरः इव भवन्तः अपि दिनचर्यां लिखन्तु।

३. पाठशालां प्रविश्य बालकार्मिकाः कीदृशीः समस्याः अनुभवन्ति? तेभ्यः भवान् कीदृशं सहाय्यं करोतीति लिखन्तु।

III. भाषांशाः

१. पदजालाभिवृद्धिः



अ) पाठस्य आधारेण समानार्थकपदानि मञ्जूषातः चित्वा लिखन्तु।

जननी, गेहं, पुत्रः, तातः, दुग्धं, अम्बा, जनकः,
गृहं, पयः, तनयः, माता, पिता, कुमारः, क्षीरं, आलयं

उदा - जननी - माता , अम्बा

१. ..... - ..... , ...

२. ..... - ..... , ...

३. ..... - ..... , ...

४.. ..... - ..... , ...

आ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां विरुद्धार्थकपदानि लिखन्तु।

१. प्रातः सूर्यः उदेति। सायं चन्द्रः उदेति।

२. गजस्य पुच्छम् अल्पम्। गजस्य भारं अधिकम्।

AP SCERT

३. रामेण वाली <u>हृष्टः</u>। वालिना रामः अहृष्टः।

४. प्रयत्नेन कार्यं <u>सफलं</u> भवति। अप्रयत्नेन कार्यं विफलं भवति।

५. सज्जनः <u>सत्यं</u> वदति। दुर्जनः असत्यं वदति।

II. व्याकरणांशाः

१. अधः दत्तानि वाक्यानि अवगच्छन्तु ।

अ. छात्रः परीक्षाम् अलिखत् ।

छात्रः परीक्षां लिखितवान् ।

आ. सीता भोजनम् अकरोत् ।

सीता भोजनं कृतवती ।



इ. बालकाः कन्दुकेन अक्रीडन् ।

बालकाः कन्दुकेन क्रीडितवन्तः ।

ई. महिलाः यात्राम् अगच्छन् ।

महिलाः यात्रां गतवत्यः ।

उपरि दत्तानि अलिखत्, अकरोत् इत्यादिक्रियापदानि तत्तद्धातूनां लङन्तरूपाणि । लिखितवान्, कृतवती इत्यादीनि **'क्तवतु'** प्रत्ययान्तरूपाणि।

२. उपरि दत्तानाम् उदाहरणानाम् आधारेण अधः दत्तानि वाक्यानि क्तवतु प्रत्ययमुपयुज्य परिवर्त्य लिखन्तु ।

अ. उपाध्यायः पाठम् अबोधयत् ।

आ. शिष्याः श्लोकम् अपठन् ।

इ. भगिन्यः कविताः अलिखन् ।

ई. भारतीयाः गणतन्त्रदिनोत्सवम् अकुर्वन् ।

उ. श्रीकृष्णः अर्जुनं गीताम् अवदत् ।

ऊ. तरुण्यः रङ्गवल्लिकाः अरचयन् ।

APSCERT



३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

यथा - परमार्थः = परम + अर्थः (अ + अ = आ)

कवीन्द्रः = कवि + इन्द्रः (इ + इ = ई)

भानूदयः = भानु + उदयः (उ + उ = ऊ)

उपरि दत्तेषु उदाहरणेषु

अकारस्य अकारे परे आकारः,

इकारस्य इकारे परे ईकारः,

उकारस्य उकारे परे ऊकारः आगतः ।

एतानि सवर्णदीर्घसन्धियुक्तानि पदानि ।

अ, इ, उ, ऋ इत्येषां वर्णानां सवर्णे अचि परे
तेषां दीर्घः एकादेशः भवति ।

अयं **सवर्णदीर्घसन्धिः** इति उच्यते ।



४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

१. लेखनाभ्यासः = ... + ...

२. देवालयः = ... + ...

३. महीशः = ... + ...

४. कवीश्वरः = ... + ...

५. वधूत्साहः = ... + ...

५. अधः दत्तानां विघटित पदानां संयोजनं कुर्वन्तु ।

अ. विद्या + आलयः = ...


आ. कवि + ईशः = ...

AP SCERT

इ. पृथिवी + इन्द्रः = ...

ई. गुरु + उपदेशः = ...

उ. न + अन्यथा = ...



परियोजनाकार्यम्

बालकार्मिकव्यवस्थायाः निर्मूलनार्थं सर्वकारः कान् मार्गान् अनुसरति? विद्याशाखाजनान्, कार्मिकजनान्, उपाध्यायान् अन्यान् च पृष्ट्वा, विषयसङ्ग्रहणं कृत्वा कक्ष्यायां वदन्तु ।



स्वीयमूल्याङ्कनम्




१.	प्रतिदिनं कृतानि कार्याणि दिनचर्यायां लेखितुं शक्नोमि ।	आम् / न
२.	पाठे स्थितानि नामवाचकपदानि अभिज्ञातुं शक्नोमि ।	आम् / न
३.	बालकार्मिकानां समस्याः अवगत्य, तेषां साहाय्यं कर्तुं शक्नोमि ।	आम् / न
४.	पाठं सम्भाषणरूपेण लेखितुं शक्नोमि ।	आम् / न


परोपकारः पुण्याय पापाय परपीडनम् ।

AP SCERT


विद्यालयमहत्त्वम्
विद्यालयः
ज्ञानप्राप्तिः
सद्गुणविकासः
लक्ष्यसाधनम्
वसुधैवकुटुम्बभावना
भावविनिमयकौशलम्
उत्तमजीवनविधानम्
कलाविकासः
प्रतिभाविकासः



बालकः पुस्तकं स्वीकरोति



शिशुः रिङ्गति



बालः पश्यति



बालकः कागदं दृणाति



युवकः वहनं चालयति



बालकः युवकं पृच्छति



बालकः भोजनं खादति




बालिका जलेन सिञ्चति



वृक्षकाण्डं विदारयति



कृषकः क्षेत्रं कर्षति




बालकः कन्दुकेन क्रीडति




बालिका जलं पिबति


AP SCERT



बालिका प्रविशति



बालकः हसति



छात्रः लिखति



युवकः वस्त्रं निष्पीडयति



बालकः कूर्दति



बालकः चलति




बालिका धावति




युवकः टंकयति



बालिका निष्ठीवति



पुरुषः नदीं तरति




बालकः पतति




बालिका पुस्तकं पठति


AP SCERT




युवकः जालं प्रसारयति




बालकः उपविशति



छात्रः कण्डूयति




विद्यार्थी चिन्तयति



बालः क्रीडति




बालिका नमति




बालकः कन्दुकं प्रहरति



बालिका जलं पिबति




बालकः पत्रं विसर्जति



बालकः चिन्तयति




वस्त्रं शोषयति



बालकः उपविशति


AP SCERT



बालिका रुदति




बालिका निष्ठीवति



बालकः वपति




युवकः वस्त्रं पुटीकरोति




बालकः कन्दुकं क्षिपति




बालकः धावति




युवकः लेपयति




माता क्षीरं पाययति



युवकः द्वारं पिदधाति



युवकः पृच्छति



बालकः वमति

AP SCERT

५. सन्देशः

B6N2R1

अभ्यसनफलितानि -

- स्फोरकपत्रविषयान् वदेयुः। (पाठ्यप्रणालीलक्ष्यं - १)
- सम्भाषणानुगुणं सम्भाषणसन्देश सुधर्मा संस्कृतभारती विषयान् जानीयुः। (पाठ्यप्रणालीलक्ष्यं - २)
- भित्तिपत्रप्रयोजनानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ४)
- नूतनभाषाधिगमसमस्याः उक्त्वा संस्कृतभाषाधिगमसौलभ्यानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ३)

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः

१. उपरितनं भित्तिपत्रं किमधिकृत्य वदति ? एतादृशं भित्तिपत्रं कदापि दृष्टवान् वा ?

२. कस्य देवस्य ब्रह्मोत्सवः प्रचलति ?

३. ब्रह्मोत्सवः कस्मिन प्रदेशे प्रचलति ? कति दिनानि प्रचलति ?

(पौत्रः पितामहः द्वावपि देवालयं गच्छतः । देवालयस्य पुरतः पौत्रः एकं भित्तिपत्रं दृष्टवान् ।)

शिवः - पितामह! क्षणं तिष्ठतु । अत्र किमपि भित्तिपत्रं मम मनः आकर्षति, पठित्वा आगच्छामि ।

पितामहः - भवतु, पौत्र ! तत्पत्रम् अहमपि पठामि ।

शिवः - सम्भाषणसन्देशः बेङ्गलूरुतः प्रकाश्यमाना संस्कृतमासपत्रिका (इति पठित्वा) पितामह ! भवान् एतां संस्कृतमासपत्रिकां जानाति वा ?

पितामहः - वत्स ! एतां पत्रिकाम् अहं जानामि ।



शिवः - तथा वा अत्र संस्कृतभारती इत्यपि अस्ति । सापि काचन पत्रिका वा ?

पितामहः - भद्र ! संस्कृतभारती इति पत्रिका न, संस्कृतभाषायाः प्रचारं कुर्वती काचन स्वच्छन्दसंस्था । देशे विदेशेषु च संस्कृतप्रचारार्थम् इयं संस्था बहुविधानि कार्याणि करोति । तेषु प्रचारकार्येषु मासपत्रिकायाः प्रकाशनमपि अन्यतमं कार्यम् ।

शिवः - पितामह ! एतत् सर्वं भित्तिपत्रे नास्ति । भवान् कथं जानाति ?

पितामहः - भवतः संस्कृताध्यापिका रत्नावलीभगिनी कदाचित् मां सन्देशपत्रिकाविषये अवदत्। तथा च तस्यां 'सर्वेऽपि विषयाः सरलसंस्कृतेन लिखिताः सर्वेषां सुबोधाः भवन्ति' इति उक्तवती। अहं द्वित्रवारं तां पत्रिकां पठितवान् ।

शिवः - इत्युक्ते तेलुगुपत्रिकासु इव अत्रापि कथाः, हास्यकणिकाः चित्राणि च भवन्ति वा ?

© NCERT

पितामहः - अथ किम् ? बालानां कृते बालमोदिनी नाम्ना कथाः, चित्रकथाः भवन्ति ।एवं धारावाह्यः, संस्कृतवार्ताः, गीतानि, वैज्ञानिकांशाः, भाषाविषयकाः, प्रबन्धः, निघण्टुः, पदरञ्जनी, हास्यकणिकाः इत्यादयः बहवः विषयाः अस्यां पत्रिकायां भवन्ति ।

शिवः - एवं वा ! किन्तु जनाः प्रान्तीयदिनपत्रिकामेव न पठन्ति । एषा संस्कृतपत्रिका खलु ! एतां के पठन्ति ?

पितामहः - वत्स ! सुधर्मा नाम संस्कृतदिनपत्रिका अस्ति । तां भारतदेशे कोणे कोणे सहस्रशः

समाजस्य हितम् संस्कृते निहितम्

सम्भाषणसन्देशः

कथा - विज्ञान - भाषाभ्यास - भाषापाठ - आधुनिकवार्ता - हास्य - विविधलेखैः युक्ता, संस्कृतभारत्या बेङ्गलूरुतः प्रकाश्यमाना संस्कृतमासपत्रिका।

वार्षिकग्राहकशुल्कम् - रू २००/-

द्वैवार्षिकग्राहकशुल्कम् - रू ४००/-

त्रैवार्षिकग्राहकशुल्कम् - रू ५६०/-

SAMBASHANA SANDESHA

AKSHARAM , IInd PHASE, 8TH CROSS ROAD,

GIRINAGAR, BANGLORE - 560085

PH - 080 26722576, 0944915974

जनाः प्रतिदिनं पठन्ति। सन्देशपत्रिकां तु न केवलं भारते किन्तु विदेशेषु अपि संस्कृताभिमानिनः पठन्ति ।

शिवः - अहो तावन्तः जनाः पठन्ति वा ? तर्हि ते सर्वेऽपि संस्कृतपण्डिताः इति चिन्तयामि ।

पितामहः - नैव, नैव, सर्वेऽपि पण्डिताः न । संस्कृतपण्डिताः, सामान्यसंस्कृतज्ञाः, संस्कृतभाषां ज्ञातुं ये इच्छन्ति ते, उपाध्यायाः, व्यापारिणः, वैद्याः, छात्राः एवं विविधक्षेत्रेषु कार्यं कुर्वाणाः जनाः सम्भाषणसन्देशम् आनन्देन पठन्ति । यतः सन्देशे सरलसंस्कृतं भवति । प्रेरणात्मकाः विषयाः भवन्ति ।

शिवः - छात्राः अपि पठन्ति वा ? सरलसंस्कृतं चेत् अहमपि अवगन्तुं शक्नोमि । पितामह ! वयमपि एतां पत्रिकां स्वीकुर्मः । अहं प्रतिदिनं पठामि । पाठशालां नीत्वा मित्राणि दर्शयामि ।

पितामहः - भद्र ! भवान् सम्यक् उक्तवान् । अहमपि बहुकालतः एतां पत्रिकां स्वीकर्तुमिच्छामि । अतः अद्य एव शुल्कं प्रेषयामः । सङ्केतं लिखतु ।

APSCERT

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु



अ. शिवः पितामहेन सह गच्छन् भित्तिपत्रं दृष्टवान् खलु ! तस्मिन् भित्तिपत्रे के के अंशाः सन्ति ?

आ. भित्तिपत्राणां विषये भवन्तः किं जानन्ति ? भित्तिपत्राणि किमर्थं लेपयन्ति ?

इ. संस्कृतभाषाविषये भवन्तः कान् विषयान् ज्ञातवन्तः ?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तं परिच्छेदं पठित्वा तस्याधारेण प्रश्नानां समाधानानि लिखन्तु ।

संस्कृतभाषा प्राचीनतमा भाषा। संस्कृतभाषायां बह्व्यः पत्रिकाः सन्ति। गैर्वाणी इति मासपत्रिका अस्ति। गैर्वाणीपत्रिका चित्तूरु नगरात् प्रकाश्यते। सुधर्मा नाम दिनपत्रिका विद्यते। संस्कृतपत्रिकासु साहित्यविषयाः वर्तन्ते। पत्रिकासु भाषा सरला भवति।

अ) गैर्वाणीपत्रिका कस्मात् नगरात् प्रकाश्यते?

आ) संस्कृतभाषायां काः दिनपत्रिकाः सन्ति?

इ) ..... प्राचीनतमा भाषा। ( )

क) संस्कृतभाषा ख) तेलुगुभाषा ग) कन्नडभाषा

ई) पत्रिकासु भाषा ..... भवति। ( )

क) कठिना ख) सरला ग) आलङ्कारिका

II. भावव्यक्तीकरणम् - सर्जनात्मकता



१. अधः दत्तानां प्रश्नानां समाधानानि व्यासरूपेण लिखन्तु।

अ.सम्भाषणसन्देशे के के विषयाः भवन्ति? के के पठन्ति?

आ.भित्तिपत्राणि कतिविधानि भवन्ति ? तेभ्यः कानि प्रयोजनानि सन्ति?

AP SCERT

इ. सम्भाषणसन्देशस्य विषये भवताम् अभिप्रायः कः ?



२. अधः दत्तानां प्रश्नानां समाधानानि सर्जनात्मकतया लिखन्तु।

अ. नूतनभाषायाः अधिगमनसमये काः समस्याः भवन्ति ?
तासां परिष्कारं कथं कुर्मः ?

आ. ''संस्कृतभाषां सुगमतया अधिगन्तुं शक्नुमः'' इति विषये भवतामभिप्रायः कः?

इ. ''अस्माकं पाठशालायां दशदिनसंस्कृतसम्भाषणशिबिरं चालयन्तु'' इति प्रार्थयन्तः संस्कृतभारत्यै एकं लेखं लिखन्तु ।

III. भाषांशाः

१. पदजालाभिवृद्धिः



१. मञ्जूषातः योग्यं पदं चित्वा रिक्तस्थानानि पूरयन्तु । स्वीयवाक्यानि लिखन्तु ।

सम्यक्, चेत्, केवलं, किन्तु, उद्दिश्य, कोणे

रामः विद्यानाथम् ..... एवं वदति, मित्र !
भवान् ..... पठति चेत् देशस्य ..... अपि कार्यं कर्तुं शक्नोति ।.....पठनमात्रेण ज्ञानं पूर्णं न भवति।
..... अभ्याससहितं पठनं करोति ..... अवश्यं कार्यसिद्धिः भवति।

२. अधः दत्तानां समानार्थकपदानां योजनं कुर्वन्तु।

१. मनः	( )	अ)	बुधः
२. वैद्यः	( )	आ)	मूल्यम्
३. व्यापारी	( )	इ)	विद्यार्थी
४. शुल्कं	( )	ई)	चित्तम्
५. पण्डितः	( )	उ)	भिषक्
६. छात्रः	( )	ऊ)	वणिक्

APSCERT

३. अधः दत्तम् अनुच्छेदं पठित्वा विरुद्धार्थकपदानि चित्वा लिखन्तु।



मानवानां जन्मप्रदेशं स्वदेशं भवति। केचन धनार्जनं कर्तुं विदेशं गच्छन्ति। धनसम्पादनेन आनन्दम् अनुभवन्ति। कष्टकाले विषादम् अपि अनुभवन्ति। केचन विद्याभ्यासार्थमपि विदेशं गच्छन्ति। विद्याभ्यासस्य मार्गः आरम्भे कठिनः भवति। परन्तु परिश्रमेण सरलः भवति। यः शास्त्रं जानाति सः पण्डितः इति कथ्यते। यः च किमपि न जानाति सः पामरः भवति।

अ) ..... x ..... आ) .....x .....

इ) .....x ..... ई) .....x .....

२. व्याकरणांशाः

१. श्लोकस्य पादं पठन्तु । रेखाङ्कितपदे अवगच्छन्तु ।

अनभ्यासे विषं विद्या - अजीर्णे भोजनं विषम् ।



अनभ्यासः - न अभ्यासः ।

अजीर्णम् - न जीर्णम् ।

मिलितयोः द्वयोः पदयोः अथवा अनेकपदानां मेलने **समासः** इति व्यवहारः । समासार्थावबोधकं वाक्यं **विग्रहवाक्यम्** इति व्यवहारः । उपरितनस्य समासस्य **"नञ् तत्पुरुषः"** इति व्यवहारः ।

२. अधः दत्तानां समासानां विग्रहवाक्यानि लिखन्तु ।

अ. असत्यम् -

आ. अधर्मः -

इ. अनावश्यकम् -

ई. अदृष्टम् -

उ. अतर्कितम् -

ऊ. अनन्तः -

AP SCERT

३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

अ. गणेशः = गण + ईशः (अ + इ = ए)

अ. देशोन्नतिः = देश + उन्नतिः (अ + उ = ओ)

इ. देवर्षिः = देव + ऋषिः (अ + ऋ = अर्)

उपरितनेषु उदाहरणेषु



अकारस्य इकारे परे 'एकारः'

अकारस्य उकारे परे 'ओकारः'

अकारस्य ऋकारे परे 'अर्' आगतः ।

एतानि गुणसन्धियुक्तानि पदानि ।

अ,आ इत्येताभ्यां वर्णाभ्याम् इ,ई इत्येतयोः परयोः एकारः, उ, ऊ इत्येतयोः परयोः ओकारः, ऋ ॠ इत्येतयोः परयोः अर् च पूर्वपरयोः स्थाने एकादेशाः भवन्ति ।

अयं **गुणसन्धिः** इति उच्यते ।

४. अधः दत्तानां पदानां विघटनं कुर्वन्तु ।



अ. देवेन्द्रः = ... + ...

आ. रमेशः = ... + ...

इ. यथोक्तम् = ... + ...

ई. गुणोत्तमः = ... + ...

उ. महर्षिः = ... + ...

५. अधः दत्तानां विघटित पदानां संयोजनं कुर्वन्तु ।

अ. राजा + ऋषिः = ...

आ. महा + उत्सवः = ...

इ. सूर्य + उदयः = ...

ई. परम + ईश्वरः = ...

उ. उप + इन्द्रः = ...

APSCERT



परियोजनाकार्यम्

वृक्षेभ्यः अस्माकं बहूनि प्रयोजनानि सन्ति। कालुष्यनिवारणाय वृक्षाः आधारभूताः। सर्वोपि छात्रः एकैकं वृक्षं रोपयित्वा तं संरक्षेत्। तस्य उत्तरदायित्वं छात्राः स्वीकुर्युः। एतं विषयं ग्रामस्थाः सर्वे यथा जानीयुः तथा एकं भित्तिपत्रं निर्मान्तु।

।। संस्कृतभाषावर्धिनी ।।

एतत् किं फलम् ?	स्वतन्त्र्यदिनोत्सवः कदा आचर्यते?	मम पुस्तकं कुत्र अस्ति?
तत् किं पुस्तकम्?	छात्राः कदा विद्यालयं गच्छन्ति?	भवतः गृहं कुत्र अस्ति?
स्यूते किम् अस्ति?	भवतः जन्मदिनं कदा भवति?	सरस्वतीदेवालयः कुत्र अस्ति?
चलनचित्रं कथं अस्ति?	योगाभ्यासः किमर्थं करणीयः?	भवान् कुतः आगच्छति?
बालिका परीक्षां कथं लिखति?	छात्रः किमर्थं पाठति ?	वृष्टिः कुतः पतति?
रामः ग्रामं कथं गच्छति?	बालकः किमर्थं रुदति?	नदी कुतः प्रवहति?
आरोग्यं कथम् अस्ति?	वृक्षाः किमर्थं फलन्ति?	गोपालः क्षीरं कुतः आनयति?
मयूरः कथं नृत्यति?	बालः किमर्थं रुदति ?	वन्देभारत रेलयानं कुतःआयाति?
अयोध्यातः काशी कियत् दूरम् ?	इदानीं कियान् समयः?	भवतः कियती शक्तिः अस्ति?
आम्रफलम् कियत् मूल्यम्?	कृषकः कियान् परिश्रमं करोति?	रुद्रमदेवी कियती शक्तिमती?

AP SCERT

रामः कीदृशः?	सूर्यस्य कान्तिः कीदृशी?	यान्त्रिकविज्ञानं कीदृशम्?
व्याघ्रः कीदृशः?	दुर्जनस्य बुद्धिः कीदृशी?	कीदृशं फलं रोचते?
नारिकेलवृक्षः कीदृशः?	चलवाणी कीदृशी?	कीदृशं चलनचित्रम् पश्यति?
समर्थः कीदृशः?	विद्या कीदृशी ?	कीदृशं कार्यं करणीयम्?

परीक्षा अस्ति अतः छात्राः पठन्ति।	बालः रोदिति यतः पिता ताडितवान्।
समयः नास्ति अतः शीघ्रं गच्छामि।	सुरेशः औषधं स्वीकरोति यतः ज्वरः अस्ति।
सिंहः गर्जति अतः मृगाः धावन्ति।	व्यापारी दुःखितः यतः धनं नष्टम्।



स्वीयमूल्याङ्कनम्



१. पाठाधारेण भित्तिपत्रे स्थितान् अंशान् वक्तुं शक्नोमि ।	आम् / न
२. पाठं धारालतया पठितुं, पाठे स्थितानि षडक्षरपदानि ज्ञात्वा लेखितुं च शक्नोमि ।	आम् / न
३. सम्भाषणसन्देशस्य लक्ष्याणां विवरणं कर्तुं शक्नोमि ।	आम् / न
४. भित्तिपत्रस्य निर्माणं स्वयं कर्तुं शक्नोमि ।	आम् / न

कृषितो नास्ति दुर्भिक्षम् ।

ARSCERT

चटक ! चटक !

चटक ! चटक ! रे चटक !
चिव् चिव् कूजसि त्वं विहग !
।। चटक ! चटक ।।
नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता
।। चटक ! चटक ।।
मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम्
एहि समीपं चिव् चिव् मित्र !
ददामि तुभ्यं बहु धान्यम्
।। चटक ! चटक ।।
चणकं स्वीकुरु पिब रे नीरं
त्वं पुनरपि रट चिव् चिव् चिव्
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम्
।। चटक ! चटक ।।

डा. विश्वासः



RSCERT


सस्कृतभारत्याः कार्याणि

संस्कृतभारती

संस्कृतभाषारक्षणम्



सम्भाषणशिबिराणि



संस्कृतपुस्तकप्रकाशनम्



शिक्षकप्रशिक्षण्



सांस्कृतिककार्यक्रमाः



समाजे संस्कृतप्रचारः




संस्कृतसम्भाषणम्




संस्कृतं विश्वव्याप्तकरणम्





భారతీయవిజ్ఞానమంజరీ



सुश्रुतः (Sushruta)

సుశ్రుతః ప్రాచీనభారతస్య మహాన్ శల్యచికిత్సకః అస్తి.
అయం **'सुश्रुतसंहिता'** ఇతి గ్రంథం రచితవాన్.
ఏషః "శల్యచికిత్సాయాః పితామహః" (Father of Surgery) ఇతి కథ్యతే.

AP SCERT

६. किं न्याय्यम् ?

T7B9V5

अभ्यसनफलितानि -

- चित्रं वीक्ष्य संघटनां वदेयुः। (पाठ्यप्रणालीलक्ष्यं - १)
- कथां वाक्यानुगुणम् अर्थं विज्ञाय कथां स्वयं पठेयुः, वदेयुः। (पाठ्यप्रणालीलक्ष्यं - २)
- भितिपत्रप्रयोजनानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ४)
- नूतनभाषाधिगमसमस्याः उक्त्वा संस्कृतभाषाधिगमसौलभ्यानि वदेयुः। (पाठ्यप्रणालीलक्ष्यं - ३)

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः

१. चित्रे के के सन्ति ? ते किं कुर्वन्ति ?

२. चित्रे विद्यमाना महिला किं कथयति ?

३. आभरणानि कः अपहृतवान् ?

उद्देश्यम् - मानवजीवनमूल्यानां ज्ञापनम् । विविधसन्दर्भेषु नूतनानुभूतीनां परिचयः । नैतिकमूल्यानां शिक्षणम् ।



पुरा जयन्तीपुरस्य राज्ञः सोमसिंहस्य समीपे एकः विशिष्टः कपोतः आसीत् । तस्य नाम शान्तः । सः राज्ञः अतीव प्रियतमः, चतुरः सम्भाषणशीलश्च आसीत्।

शान्तः अन्तःपुरे स्वेच्छया विहरति स्म । एकदा प्रातः अन्तःपुरात् बहिरागतस्य तस्य कर्णे पतितं यत् 'अरण्ये एकः अमृतवृक्षः अस्तीति, तत् फलं खादन्ति चेत् नित्ययौवनाः अजरामराश्च भवन्ति' इति । तच्छ्रुत्वा सः कपोतः यथा कथञ्चित् तत्र गत्वा तत् फलमानीय राज्ञे दास्यामीति निश्चयमकरोत् । परस्मिन् दिने सः कपोतः अत्यन्तसाहसेन अटवीं गत्वा तं पादपं दृष्ट्वा फलं छित्त्वा पुनः आगच्छन् आसीत् । तस्मिन् समये मार्गमध्ये सूर्यः अस्तं गतः । सर्वत्र अन्धकारः व्याप्तः ।

रात्रौ प्रतिगमनं कष्टमिति मत्वा कपोतः एकस्मिन् वृक्षे विश्रान्तिं स्वीकर्तुं निश्चित्य तस्य तरोः कोटरे अमृतफलं स्थापितवान् । तस्मिन् कोटरे एकः सर्पः निवसति स्म ।

आहारार्थं गतः स भुजङ्गः पुनरागत्य तत् फलं दृष्टवान् । खादितुमारभ्य अरुचिः इति मत्वा परित्यक्तवान् । एवं तत् फलं विषपूरितम् अभवत् । एतत् अजानन् कपोतः प्रातः तत् फलं स्वीकृत्य राजमन्दिरम् आगतवान् । फलं राज्ञे दत्त्वा तस्य विशेषताम् उक्तवान् च ।



APSCERT

फलं खादितुम् उद्युक्तः राजा प्रधानमन्त्रिणा निवारितः । 'प्रथमतः तस्य फलस्य भागः यस्मै कस्मैचित् निवेद्य ततः भवान् स्वीकरोतु' इति मन्त्रिणा उक्तम् ।

तदा राजा कञ्चित् फलभागं काकाय दत्तवान् । काकः तत् शकलं खादित्वा सपदि मृतः । मन्त्री उक्तवान् 'हे राजन् ! भवान् दुर्दैवात् मुक्तः । एतत् फलं दत्त्वा भवन्तं हन्तुमुद्युक्तः कपोतः' इति । राजा क्रोधेन ''एनं कपोतं कानने त्यजन्तु । विषफलं च अरण्ये भूमौ स्थापयन्तु'' इति भटान् आदिष्टवान् । तत् श्रुत्वा कपोतः अतीव दुःखितः । ते कपोतम् अटव्यां व्यसृजन्। भटाः फलं भूमौ स्थापितवन्तः ।






आश्चर्यकरोऽयं विषयः यत् सद्यः तत्रैकः महान् वृक्षः जातः । सः वृक्षः अद्भुतफलैः विराजमानश्च आसीत् । भटाः एतत् विचित्रं विषयं राजानमुक्तवन्तः । तत् श्रुत्वा राजा एवमादिष्टवान् - ''यः कोऽपि तत्र न गच्छेत् । तत् फलं च न खादेत् । यतः सः विषवृक्षः'' इति ।

तस्य वृक्षस्य समीपप्रदेशे वृद्धदम्पती अवसताम् । तौ दीनौ असहायौ च, भिक्षाटनं कर्तुमपि असमर्थौ। तौ स्वजीवनसमाप्त्यर्थं तत् फलं खादितुं निश्चितवन्तौ।





रात्रौ स वृद्धः वृक्षस्य समीपं गत्वा फलद्वयं छित्त्वा गृहमानीतवान् । जायापती फले खादितवन्तौ, प्रभाते उत्थितवन्तौ स्वस्थौ तरुणौ आत्मानौ दृष्ट्वा विस्मितौ अभवताम् । एनं विषयं महाराजः ज्ञातवान् । राजा तत्र गत्वा तौ वृद्धौ दृष्ट्वा विस्मितः अभवत् ।

राजा सोमसिंहः कपोतेन आनीतं फलम् अमृतफलमेव इति ज्ञात्वा 'अहं निष्कारणेन तं दण्डितवान्' इति नितरां दुःखितः अभवत् । 'पूर्वापरम् अनालोच्य यत्किमपि क्रियते तत् अनर्थदायकं भवति । इतः परं सम्यक् विचिन्त्यैव दण्डनं करोमि' इति स निश्चितवान् ।



AP SCERT

एतानि कुर्वन्तु

I. भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु



अ. राजा यदा दण्डनं कृतवान् तदा निर्दोषी शान्तः किमर्थं मौनेन स्थितवान् ?

आ. राज्ञः कपोते प्रीतिः खलु ! भवतः प्रीतिपात्रं पक्षी कः ? किमर्थम् ?

इ. भवद्भिः दृष्टस्य विवादस्य परिष्कारं वदन्तु ।

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठस्थानि विशिष्टानि पदानि अन्विष्य लिखन्तु ।

उदा - अमृतफलम्, सम्भाषणशीलः

२. अधः दत्तानि वाक्यानि पठन्तु । पाठस्य आधारेण दोषान् निवार्य शुद्धवाक्यानि कुर्वन्तु ।

अ. न्यायान्यायविचारणम् अकृत्वा दण्डनं दातव्यम् ।

.....

आ. रात्रौ कपोतः अमृतफलं सुरक्षितं भवतीति मत्वा स्वसविधे स्थापितवान् ।

.....

इ. फलभक्षणेन हानिः नास्ति इति मन्त्रिणा उक्तम् ।

.....

ई. नित्ययौवनौ भवितुं वृद्धदम्पतिभ्याम् अमृतफलं खादितम् ।

.....

उ. राजा शान्तः कपोतः निष्कारणं दण्डितः इति ज्ञात्वा नितरां आनन्दितः अभवत् ।

.....

३. अधः दत्तं परिच्छेदं पठन्तु, तथा दत्तानां विकल्पप्रश्नानां समाधानानि लिखन्तु।

बहोः कालात् पूर्वं विष्णुपुरम् इत्याख्यं राज्यं प्रतापसेनः पालयति स्म । प्रतापसेनस्य त्रयः पुत्राः । तेषां नामानि जयधीरः, काशीनाथः, धीमान् च । एतान् त्रीन् पुत्रान् पिता गुरुकुलं प्रेषितवान् । विद्याभ्यासं कृतवतः स्वपुत्रान्

AP SCERT

राजा एकस्मिन् विरामदिने राजकार्यपरिशीलनार्थम् आस्थानं प्रति अनयत् । तस्मिन् समये राज्ञः पुरतः कश्चन विवादः जातः । सः विवादः परिष्करणीयः इति त्रीन् पुत्रान् आज्ञापयत् ।



अ. पुरा राजपुत्राः कुत्र पठन्ति स्म ? ( )

अ. पाठशालायाम् आ. गुरुकुले इ. गृहे

आ. विष्णुपुरं कः परिपालयति स्म ? ( )

अ. जयधीरः आ. धीमान् इ. प्रतापसेनः

इ. राजा स्वपुत्रान् राजकार्यपरिशीलनार्थं कुत्र अनयत् ? ( )

अ. आस्थानम् आ. अन्तःपुरम् इ. मन्दिरम्

ई. विवादः परिष्करणीयः इति राजा कान् आज्ञापयत् ? ( )

अ. भटान् आ. मन्त्रीन् इ. पुत्रान्

४. पाठ्यांशस्य आधारेण अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु।

अ. शान्तः कुत्र गतवान् ? किं कृतवान् ?

आ. राजा शान्तं दण्डितवान् । किं तत् युक्तम् ? किमर्थम् ?

इ. अमृतफलं विषफलत्वेन कथं परिणतम् ?

ई. मन्त्री शान्तम् उद्दिश्य राजानं किमुक्तवान् ?

उ. वृद्धदम्पती किमर्थं मर्तुं चिन्तितवन्तौ ?

II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तानां प्रश्नानां समाधानानि व्यासरूपेण लिखन्तु।



१. किं न्याय्यम् इति पाठ्यभागसारांशं स्वीयवाक्यैः लिखन्तु।

२. वृद्धदम्पती किमर्थं तत् विषफलं खादितुम् उद्युक्तौ । तयोः समस्याः काः? तासां परिष्कारः कथं करणीयः ?

३. सर्पेण अमृतफलभक्षणं न क्रियते चेत् किं भवति स्म ?

APSCERT

आ. अधः दत्तानां प्रश्नानां समाधानानि सर्जनात्मकतया लिखन्तु।



१. राजमन्दिरे प्रचलितं सन्दर्भं नाटकरूपेण प्रदर्शयन्तु ।

२. फलं खादितुम् उद्युक्तं राजानं मन्त्री यदि न निवारयेत् कथा कथं भवति स्म ? तस्य सन्दर्भस्य परिवर्तनं कृत्वा लिखन्तु ।

३. पौर्वापर्यम् अविचार्य कार्यकरणेन के के नष्टाः भवन्ति इति लिखन्तु।

III. भाषांशाः

अ. पदजालाभिवृद्धिः



१. भवतः इष्टफलानां नामानि लिखित्वा तेषां वर्णं रुचिं च लिखतु ।

फलस्य नाम	फलस्य वर्णः	फलस्य रुचिः

२. अधः दत्तम् अनुच्छेदं पठित्वा रेखाङ्कितपदानां समानार्थकपदानि लिखन्तु।

एकदा अवन्तीपुरे एकः राजा आसीत्। सः अतीव चतुरः आसीत्। एकदा मध्याह्नकाले यदा सूर्यः प्रकाशते तदा सः विहारार्थम् अटवीम् अगच्छत्। तत्र एकः भयङ्करः सर्पः अस्ति। राजा सर्पं दृष्ट्वा भीतः न अभवत्। तस्य राज्ये वृद्धदम्पती अवसताम्। तौ बहुकष्टानि अनुभवतः। राजा तयोः साहाय्यं अकरोत्।

अ. राजा - ..... आ. चतुरः -..... इ. सूर्यः -.....

ई. अटवीम् - ..... उ. सर्पः -..... ऊ. दम्पती -.....

AP SCERT

३. मञ्जूषायां विद्यमानानि पदानि उपयुज्य विरुद्धार्थकपदानि लिखन्तु।

अन्धकारः, अमृतं, प्रकाशः, आलोच्य, मुक्तः, प्रियं, दुःखं, विषं, अप्रियं, बन्धितः, अनालोच्य, सुखं

अ. ..... x ..... आ. ..... x .....

इ. .....x..... ई. .....x.....

उ. .....x..... ऊ. ..... x .....

२. व्याकरणांशाः

१. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।



अ. छात्रः श्वः पाठशालां गमिष्यति ।

आ. अद्यतनबालाः श्वस्तनपौराः भविष्यन्ति ।

इ. वृक्षकः वृक्षः भूत्वा फलानि दास्यति ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि भविष्यत्क्रियां सूचयन्ति । एतादृश क्रियापदानां 'लृट्' इति व्यवहारः।

२. अधः दत्तानि पदानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु ।

अ. भविष्यामः आ. करिष्यन्ति इ. द्रक्ष्यामः

ई. वदिष्यामि उ. खादिष्यामः ऊ. लेखिष्यन्ति

३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

तत्रैव = तत्र + एव (अ + ए = ऐ)

तवैश्वर्यम् = तव + ऐश्वर्यम् (अ + ऐ = ऐ)

गङ्गौघः = गङ्गा + ओघः (आ + ओ = औ)

ममौषधम् = मम + औषधम् (अ + औ = औ)

APSCERT

उपरितनेषु उदाहरणेषु अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **'ऐकारः'**, ओ, औ इत्येतयोः परयोः **'औकारः'** आगतः ।

एतानि वृद्धिसन्धियुक्तानि पदानि ।



अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **ऐकारः**

ओ, औ इत्येतयोः परयोः **औकारः** च पूर्वपरयोः स्थाने एकादेशो भवति ।

अयं **वृद्धिसन्धिः** इति उच्यते ।

४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

अ. एकैकम् = ... + ...

आ. महैश्वर्यम् = ... + ...

इ. दिव्यौषधम् = ... + ...

ई. देशौन्नत्यम् = ... + ...

उ. वसुधैव = ... + ...

५. अधः दत्तानां पदानां योजनं कुर्वन्तु ।

अ. अष्ट + ऐश्वर्याणि = ...

आ. जन + ऐक्यम् = ...

इ. परम + ओषधिः = ...

ई. वाक्य + ओघः = ...

उ. महा + औदार्यम् = ...



परियोजनाकार्यम्

पक्षिणां चित्राणि सङ्गृह्य पटे लेपयन्तु । तेषां नामानि विवरणं च विलिख्य प्रदर्शयन्तु ।

APSCERT

।। संस्कृतभाषावर्धिनी ।।

आकाशे नक्षत्राणि सन्ति

गृहे माता अस्ति

वृक्षे काकः वर्तते

समुद्रे अत्यधिकं जलम् वर्तते

आपणे वस्तूनि सन्ति

प्रकोष्ठे छात्राः सन्ति

तिरुमलगिरौ देवालयः अस्ति

अग्नौ काष्ठानि ज्वलन्ति

गुरौ विज्ञानं अस्ति

वायौ कालुष्यम् अधिकमस्ति



संस्कृतभाषायां विज्ञानम् अस्ति

मञ्जूषायां रत्नानि सन्ति

लतायां पुष्पाणि विकसन्ति

पाठशालायां छात्राः सन्ति

कथायां नीतिः वर्तते

स्थालिकायां भोजनम् अस्ति

ग्रीवायां हारः प्रकाशते

नद्यां जलम् अस्ति

लेखिन्यां पुनःपूरणी नास्ति

नगर्यां भवनानि सन्ति

वध्वां सुगुणाः सन्ति




स्वीयमूल्याङ्कनम्




१.	पाठ्यांशचित्रस्य आधारेण कथां स्वीयवाक्यैः वक्तुं शक्नोमि ।	आम् / न
२.	पाठं पठित्वा वाक्यानि सम्यक्तया लेखितुं शक्नोमि ।	आम् / न
३.	राजमन्दिरे सङ्घटितं विषयं नाटकरूपेण लेखितुं शक्नोमि ।	आम् / न

सत्येन रक्ष्यते धर्मः ।

AP SCERT





భారతీయవిజ్ఞానమంజరీ

వరాహమిహిరః (Varahamihira)

వరాహమిహిరః మహాన్ జ్యోతిర్విజ్ఞానీ గణితజ్ఞః చ ఆసీత్. తేన 'పంచసిద్ధాంతికా', 'బృహత్సంహితా' చ రచితా. భూమౌ జలస్య అస్తిత్వవిషయే (presence) అపి తేన వివరణం దత్తమ్.

पठन्तु गायन्तु नन्दन्तु

चटक ! चटक !

चटक ! चटक ! रे चटक !
चिव् चिव् कूजसि त्वं विहग !
॥ चटक ! चटक ॥
नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता
॥ चटक ! चटक ॥
मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम्
एहि समीपं चिव् चिव् मित्र !
ददामि तुभ्यं बहु धान्यम्
॥ चटक ! चटक ॥
चणकं स्वीकुरु पिब रे नीरं
त्वं पुनरपि रट चिव् चिव् चिव्
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम्
॥ चटक ! चटक ॥

- डा. विश्वासः

APSCERT

मशकराज्यम्



मशकपुरी नाम ग्रामः कश्चित् अस्ति। तत्र यः कोऽपि जनः जृम्भणादिकं कर्तुं यदा कदाचित् मुखम् उद्घाटयति तदा मुखे शतशः मशकाः प्रविश्य मुखगह्वरं पूरयन्ति । मुखे शतशः मशकाः एव मशकाः । मशकानां निर्मूलनार्थं ग्रामीणाः प्रयत्नं न कृतवन्तः । अतः मशकाः कोटिकोटिसङ्ख्याम् अतिक्रम्य वृद्धिं गताः। मनुष्याणां सङ्ख्या तु न्यूना जाता । अन्ते सः प्रान्तः सर्वः मशकराज्यमिति प्रसिद्धः अभवत् ।


सिंहासने विलासेन मशकराजः उपविष्टः अस्ति । महामात्यः राजानं दृष्ट्वा एवमवदत् -''महाराज! भाद्रपदमासतः पौष्यमासपर्यन्तम् अस्माकं कारणतः मनुष्याणां बहवः रोगाः भवन्ति। तेषु रोगेषु शीतज्वरः (మలేరియా) पादशोथः (బోదకాలు) इत्यादिसाङ्क्रमिकरोगाः सर्वत्र व्याप्य मानवान् निर्मूलयन्ति । तथा मानवजातेः निर्मूलनार्थं प्रणालिकाद्वयम् अहं सिद्धं कृतवान् ।

प्रथमप्रणालिकां शृणोतु । अनाफिलीस् जातीयाः मशक्यः जीर्णज्वरव्याधिं (టైఫాయిడ్) व्यापयन्ति। प्रतिजनं दंशनं कृत्वा मानवानां रक्ते सूक्ष्मजीविनः प्रेषयन्ति । एवं क्रमशः तेषां रोगवर्धनं भवति ।

द्वितीयप्रणालिकां श्रावयामि । मस्तिष्कशोथः (మెదడువాపు) वर्षद्वयदेशीयं बालम् आरभ्य द्वादशवर्षीयबालपर्यन्तम् एषः व्याधिः आगच्छति । सूक्ष्मजीविभ्यः व्याधिः सङ्क्रामति। अतः मशकसैनिकान् सर्वत्र प्रेषयन्तु । यत्र वराहाः, कालुष्यजलपूर्णानि पल्वलानि (బురదగుంటలు) कदम्बकाः अधिकाः भवन्ति तत्र अस्मत्सैन्यं गच्छेत्'' इति ।

मशकामात्यं प्रति मशकमहाराजः इत्थमवोचत् - 'मानवनिर्मूलनार्थं भवतः प्रणालिकाद्वयम् अद्भुतं महाद्भुतम् अस्ति' इति । सपदि एव सैन्याध्यक्षः 'अहमिदानीमेव सैन्यं स्वीकृत्य मानवान् आक्रम्य तान् निर्मूलयामि' इत्युक्त्वा ससैन्यं गतवान् । मशकानाम् आक्रमणेन मानवाः रोगग्रस्ताः अभवन् । केचन मानवाः मृताः, केचन मृतप्रायाः अभवन् ।

एवं स्थिते मशकान् निर्मूलयितुं सर्वैः मानवैः अपि एका गोष्ठी आयोजिता । वैद्यप्रमुखाः आगत्य रोगनिवारणोपायान् औषधानि च सूचितवन्तः । ''यत्र यत्र जलपूर्णाः गर्ताः सन्ति तान् मृत्तिकया पूरयन्तु । निम्बपत्राणि दग्ध्वा तद्धूमं मशकसञ्चारप्रदेशे व्यापयन्तु । स्थिरतया यत्र जलमस्ति तत्र तैलं स्थापयन्तु'' इत्यादिवैद्यसूचनाः जनाः सम्यक् पालितवन्तः । मशकाः मृताः । मशकपुर्याः पौराः मशकनिर्मूलनेन नितरां सन्तुष्टाः । आरोग्यं सम्प्राप्य सुखजीवनं यापितवन्तः । ततःप्रभृति तस्य ग्रामस्य नाम आरोग्यपुरी इति प्रसिद्धम् अभवत् ।



AP SCERT

ज्ञानोदयः

अवन्तीदेशस्य राजा गुणवर्मा । सः अत्यन्तमूर्खः । कोशाभिवृद्ध्यै सः सर्ववस्तुषु करं (పన్ను) विहितवान् । जनाः सर्वे तस्य पालने क्लेशान् अनुभवन्ति स्म । मन्त्रिणा अनेकवारं सूचितस्यापि तस्य मनसि परिवर्तनं नासीत् ।

तस्य राज्ये एका नदी प्रवहति स्म । नदीजलं पश्चिमतः पूर्वदिशं गच्छति स्म । राज्ञा चिन्तितं यत् 'एतेन नदीजलेन पूर्वदिशि विद्यमानस्य प्रवस्तदेशस्य सस्यानि फलन्ति । तत्रस्थजनाः सर्वे मम नदीजलमेव पिबन्ति । अतः जलविनियोगाय तद्देशराजेन करः दातव्यः' इति । मन्त्रिणं च तं विषयम् अकथयत् । तदा मन्त्रिणा उक्तं यत् ''जलं तु सार्वजनीनम् । तत् न अस्माकं स्वकीयमिति'' । मूर्खः राजा मन्त्रिणम् आदिशत् यत् ''प्राग्देशीयाः यदि करं न दास्यन्ति तर्हि वयं नद्याः जलं न दद्मः'' इति । नदीजलं स्थगितं भवति, तर्हि अवन्तीदेशस्य हानिरेव भवति इति मन्त्रिणा चिन्तितम् । एकः तरणोपायः तस्य मनसि अस्फुरत् । समनन्तरमेव मन्त्री राज्ञः अन्तःपुरे घण्टावादकं भटमेवम् उक्तवान् - साधारणतया रात्रौ समयज्ञापनार्थं घण्टावादनं भवति । अद्य अर्धघण्टासमये पूर्णघण्टावादनं करोतु इति । तदर्थं रात्रौ दशवादने दशघण्टाः सार्धदशवादने एकादशघण्टाः, एकादशवादने द्वादशघण्टाः वादनीयाः इति च। इत्थं कृते सार्धैक

जलं न प्रेषितं, प्रवस्तराजा कुपितः स
सूर्यं न प्रेषितवान् इति। राज्ञा चिन्तितं
यदि सूर्यः न उदेति, जीवनमेव कष्टं भ
''इदानीं किं कर्तव्यम् ?'' इति राजा म
पृष्टवान् । मन्त्रिणा उक्तम् - ''अस्माभि
प्रेष्यते चेत् सः अवश्यं सूर्यं प्रेषयिष्यति'
। राज्ञा ''तथैव कुरु अस्माकं तु सूर्यः
आवश्यकः'' इति उक्तम् ।२३२
मन्त्री - ''राजन् ! भवान् निद्रातु, प्रवस्त
तु दयामयः । सः सूर्यम् अवश्यं प्रेषयिष्य



चित्राणि दृष्ट्वा प्रदत्तपदानां साहाय्येन वाक्यानि रचयन्तु


1



2



3



5



6



चित्राणि दृष्ट्वा प्रदत्तपदानां साहाय्येन वाक्यानि रचयन्तु

अतिथयः खादन्ति आपणम् अधिकारी बालिका

कुर्वन्ति माता उद्योगिनः स्वागतं भोजनं स्वपुत्रीं

व्यापारी आम्रफलम् नमस्कुर्वन्ति

पुष्पगुच्छेन कदलीपत्रेषु पायसं शीतलपानीयं

APDF

शब्दरूपाणि

१. इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
मतिः	मती	मतयः	प्रथमा विभक्तिः
हे मते	हे मती	हे मतयः	सम्बोधनप्रथमा विभक्तिः
मतिम्	मती	मतीः	द्वितीया विभक्तिः
मत्या	मतिभ्याम्	मतिभिः	तृतीया विभक्तिः
मत्यै, मतये	मतिभ्याम्	मतिभ्यः	चतुर्थी विभक्तिः
मत्याः, मतेः	मतिभ्याम्	मतिभ्यः	पञ्चमी विभक्तिः
मत्याः, मतेः	मत्योः	मतीनाम्	षष्ठी विभक्तिः
मत्याम्, मतौ	मत्योः	मतिषु	सप्तमी विभक्तिः

एवं स्तुतिः, कीर्तिः, नीतिः इत्यादयः ।

२. ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
पिता	पितरौ	पितरः	प्रथमा विभक्तिः
हे पितः	हे पितरौ	हे पितरः	सम्बोधनप्रथमा विभक्तिः
पितरम्	पितरौ	पितॄन्	द्वितीया विभक्तिः
पित्रा	पितृभ्याम्	पितृभिः	तृतीया विभक्तिः
पित्रे	पितृभ्याम्	पितृभ्यः	चतुर्थी विभक्तिः
पितुः	पितृभ्याम्	पितृभ्यः	पञ्चमी विभक्तिः
पितुः	पित्रोः	पितॄणाम्	षष्ठी विभक्तिः
पितरि	पित्रोः	पितृषु	सप्तमी विभक्तिः

एवं भ्रातृ, जामातृ इत्यादयः ।

AP SCERT

३. ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
माता	मातरौ	मातरः	प्रथमा विभक्तिः
हे मातः	हे मातरौ	हे मातरः	सम्बोधनप्रथमा विभक्तिः
मातरम्	मातरौ	मातॄः	द्वितीया विभक्तिः
मात्रा	मातृभ्याम्	मातृभिः	तृतीया विभक्तिः
मात्रे	मातृभ्याम्	मातृभ्यः	चतुर्थी विभक्तिः
मातुः	मातृभ्याम्	मातृभ्यः	पञ्चमी विभक्तिः
मातुः	मात्रोः	मातॄणाम्	षष्ठी विभक्तिः
मातरि	मात्रोः	मातृषु	सप्तमी विभक्तिः

एवं ननान्दृ, दुहितृ, यातृ इत्यादयः ।

४. मकारान्तः पुंलिङ्गः 'किम्' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
कः	कौ	के	प्रथमा विभक्तिः
कम्	कौ	कान्	द्वितीया विभक्तिः
केन	काभ्याम्	कैः	तृतीया विभक्तिः
कस्मै	काभ्याम्	केभ्यः	चतुर्थी विभक्तिः
कस्मात्	काभ्याम्	केभ्यः	पञ्चमी विभक्तिः
कस्य	कयोः	केषाम्	षष्ठी विभक्तिः
कस्मिन्	कयोः	केषु	सप्तमी विभक्तिः

AP SCERT

५. मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
का	के	काः	प्रथमा विभक्तिः
काम्	के	काः	द्वितीया विभक्तिः
कया	काभ्याम्	काभिः	तृतीया विभक्तिः
कस्यै	काभ्याम्	काभ्यः	चतुर्थी विभक्तिः
कस्याः	काभ्याम्	काभ्यः	पञ्चमी विभक्तिः
कस्याः	कयोः	कासाम्	षष्ठी विभक्तिः
कस्याम्	कयोः	कासु	सप्तमी विभक्तिः

६. मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
किम्	के	कानि	प्रथमा विभक्तिः
किम्	के	कानि	द्वितीया विभक्तिः
केन	काभ्याम्	कैः	तृतीया विभक्तिः
कस्मै	काभ्याम्	केभ्यः	चतुर्थी विभक्तिः
कस्मात्	काभ्याम्	केभ्यः	पञ्चमी विभक्तिः
कस्य	कयोः	केषाम्	षष्ठी विभक्तिः
कस्मिन्	कयोः	केषु	सप्तमी विभक्तिः

AP SCERT

७. अकारान्तः पुंलिङ्गः 'सर्व' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
सर्वः	सर्वौ	सर्वे	प्रथमा विभक्तिः
हे सर्व	हे सर्वौ	हे सर्वे	सम्बोधनप्रथमा विभक्तिः
सर्वम्	सर्वौ	सर्वान्	द्वितीया विभक्तिः
सर्वेण	सर्वाभ्याम्	सर्वैः	तृतीया विभक्तिः
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	चतुर्थी विभक्तिः
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	पञ्चमी विभक्तिः
सर्वस्य	सर्वयोः	सर्वेषाम्	षष्ठी विभक्तिः
सर्वस्मिन्	सर्वयोः	सर्वेषु	सप्तमी विभक्तिः

८. अकारान्तः स्त्रीलिङ्गः 'सर्व' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
सर्वा	सर्वे	सर्वाः	प्रथमा विभक्तिः
हे सर्वे	हे सर्वे	हे सर्वाः	सम्बोधनप्रथमा विभक्तिः
सर्वाम्	सर्वे	सर्वाः	द्वितीया विभक्तिः
सर्वया	सर्वाभ्याम्	सर्वाभिः	तृतीया विभक्तिः
सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः	चतुर्थी विभक्तिः
सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः	पञ्चमी विभक्तिः
सर्वस्याः	सर्वयोः	सर्वासाम्	षष्ठी विभक्तिः
सर्वस्याम्	सर्वयोः	सर्वासु	सप्तमी विभक्तिः

AP SCERT

९. अकारान्तः नपुंसकलिङ्गः 'सर्व' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
सर्वम्	सर्वे	सर्वाणि	प्रथमा विभक्तिः
हे सर्व	हे सर्वे	हे सर्वाणि	सम्बोधनप्रथमा विभक्तिः
सर्वम्	सर्वे	सर्वाणि	द्वितीया विभक्तिः
सर्वेण	सर्वाभ्याम्	सर्वैः	तृतीया विभक्तिः
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	चतुर्थी विभक्तिः
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	पञ्चमी विभक्तिः
सर्वस्य	सर्वयोः	सर्वेषाम्	षष्ठी विभक्तिः
सर्वस्मिन्	सर्वयोः	सर्वेषु	सप्तमी विभक्तिः

ARSCERT

धातुरूपाणि

परस्मैपदिधातवः

१. डुकृञ्-करणे

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
करोति	कुरुतः	कुर्वन्ति	प्रथमपुरुषः
करोषि	कुरुथः	कुरुथ	मध्यमपुरुषः
करोमि	कुर्वः	कुर्मः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
करिष्यति	करिष्यतः	करिष्यन्ति	प्रथमपुरुषः
करिष्यसि	करिष्यथः	करिष्यथ	मध्यमपुरुषः
करिष्यामि	करिष्यावः	करिष्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अकरोत्	अकुरुताम्	अकुर्वन्	प्रथमपुरुषः
अकरोः	अकुरुतम्	अकुरुत	मध्यमपुरुषः
अकरवम्	अकुर्व	अकुर्म	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
करोतु / कुरुतात्	कुरुताम्	कुर्वन्तु	प्रथमपुरुषः
कुरु / कुरुतात्	कुरुतम्	कुरुत	मध्यमपुरुषः
करवाणि	करवाव	करवाम	उत्तमपुरुषः

२. वस - निवासे

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
वसति	वसतः	वसन्ति	प्रथमपुरुषः
वससि	वसथः	वसथ	मध्यमपुरुषः
वसामि	वसावः	वसामः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
वत्स्यति	वत्स्यतः	वत्स्यन्ति	प्रथमपुरुषः
वत्स्यसि	वत्स्यथः	वत्स्यथ	मध्यमपुरुषः
वत्स्यामि	वत्स्यावः	वत्स्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अवसत्	अवसताम्	अवसन्	प्रथमपुरुषः
अवसः	अवसतम्	अवसत	मध्यमपुरुषः
अवसम्	अवसाव	अवसाम	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
वसतु / वसतात्	वसताम्	वसन्तु	प्रथमपुरुषः
वस / वसतात्	वसतम्	वसत	मध्यमपुरुषः
वसानि	वसाव	वसाम	उत्तमपुरुषः

APSCERT

३. णीञ् - प्रापणे

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
नयति	नयतः	नयन्ति	प्रथमपुरुषः
नयसि	नयथः	नयथ	मध्यमपुरुषः
नयामि	नयावः	नयामः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
नेष्यति	नेष्यतः	नेष्यन्ति	प्रथमपुरुषः
नेष्यसि	नेष्यथः	नेष्यथ	मध्यमपुरुषः
नेष्यामि	नेष्यावः	नेष्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अनयत्	अनयताम्	अनयन्	प्रथमपुरुषः
अनयः	अनयतम्	अनयत	मध्यमपुरुषः
अनयम्	अनयाव	अनयाम	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
नयतु / नयतात्	नयताम्	नयन्तु	प्रथमपुरुषः
नय / नयतात्	नयतम्	नयत	मध्यमपुरुषः
नयानि	नयाव	नयाम	उत्तमपुरुषः

४. त्यज-विसर्गे

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
त्यजति	त्यजतः	त्यजन्ति	प्रथमपुरुषः
त्यजसि	त्यजथः	त्यजथ	मध्यमपुरुषः
त्यजामि	त्यजावः	त्यजामः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
त्यक्ष्यति	त्यक्ष्यतः	त्यक्ष्यन्ति	प्रथमपुरुषः
त्यक्ष्यसि	त्यक्ष्यथः	त्यक्ष्यथ	मध्यमपुरुषः
त्यक्ष्यामि	त्यक्ष्यावः	त्यक्ष्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अत्यजत्	अत्यजताम्	अत्यजन्	प्रथमपुरुषः
अत्यजः	अत्यजतम्	अत्यजत	मध्यमपुरुषः
अत्यजम्	अत्यजाव	अत्यजाम	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
त्यजतु / त्यजतात्	त्यजताम्	त्यजन्तु	प्रथमपुरुषः
त्यज / त्यजतात्	त्यजतम्	त्यजत	मध्यमपुरुषः
त्यजानि	त्यजाव	त्यजाम	उत्तमपुरुषः

APSCERT

५. शृ - श्रवणे

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
शृणोति	शृणुतः	शृण्वन्ति	प्रथमपुरुषः
शृणोषि	शृणुथः	शृणुथ	मध्यमपुरुषः
शृणोमि	शृणुवः-शृण्वः	शृणुमः-शृण्मः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति	प्रथमपुरुषः
श्रोष्यसि	श्रोष्यथः	श्रोष्यथ	मध्यमपुरुषः
श्रोष्यामि	श्रोष्यावः	श्रोष्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अशृणोत्	अशृणुताम्	अशृण्वन्	प्रथमपुरुषः
अशृणोः	अशृणुतम्	अशृणुत	मध्यमपुरुषः
अशृणवम्	अशृणुव-अशृण्व	अशृणुम-अशृण्म	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
शृणोतु / शृणुतात्	शृणुताम्	शृण्वन्तु	प्रथमपुरुषः
शृणु / शृणुतात्	शृणुतम्	शृणुत	मध्यमपुरुषः
शृणवानि	शृणवाव	शृणवाम	उत्तमपुरुषः

६. दाण्-दाने

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
यच्छति	यच्छतः	यच्छन्ति	प्रथमपुरुषः
यच्छसि	यच्छथः	यच्छथ	मध्यमपुरुषः
यच्छामि	यच्छावः	यच्छामः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
दास्यति	दास्यतः	दास्यन्ति	प्रथमपुरुषः
दास्यसि	दास्यथः	दास्यथ	मध्यमपुरुषः
दास्यामि	दास्यावः	दास्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अयच्छत्	अयच्छताम्	अयच्छन्	प्रथमपुरुषः
अयच्छः	अयच्छतम्	अयच्छत	मध्यमपुरुषः
अयच्छम्	अयच्छाव	अयच्छाम	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
यच्छतु / यच्छतात्	यच्छताम्	यच्छन्तु	प्रथमपुरुषः
यच्छ / यच्छतात्	यच्छतम्	यच्छत	मध्यमपुरुषः
यच्छानि	यच्छाव	यच्छाम	उत्तमपुरुषः

APSCERT

७. स्मृ - चिन्तायाम्

वर्तमाने लट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
स्मरति	स्मरतः	स्मरन्ति	प्रथमपुरुषः
स्मरसि	स्मरथः	स्मरथ	मध्यमपुरुषः
स्मरामि	स्मरावः	स्मरामः	उत्तमपुरुषः

भविष्यति लृट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
स्मरिष्यति	स्मरिष्यतः	स्मरिष्यन्ति	प्रथमपुरुषः
स्मरिष्यसि	स्मरिष्यथः	स्मरिष्यथ	मध्यमपुरुषः
स्मरिष्यामि	स्मरिष्यावः	स्मरिष्यामः	उत्तमपुरुषः

अनद्यतनभूते लङ्

एकवचनम्	द्विवचनम्	बहुवचनम्	
अस्मरत्	अस्मरताम्	अस्मरन्	प्रथमपुरुषः
अस्मरः	अस्मरतम्	अस्मरत	मध्यमपुरुषः
अस्मरम्	अस्मराव	अस्मराम	उत्तमपुरुषः

विध्याशिषोः लोट्

एकवचनम्	द्विवचनम्	बहुवचनम्	
स्मरतु / स्मरतात्	स्मरताम्	स्मरन्तु	प्रथमपुरुषः
स्मर / स्मरतात्	स्मरतम्	स्मरत	मध्यमपुरुषः
स्मराणि	स्मराव	स्मराम	उत्तमपुरुषः

APSCERT

पदकोशः

अ

अकस्मात् = వెంటనే
अकृत्रिमम् = సహజమైన
अजरामराः = ముసలితనం, మరణం లేనివారు
अजानन् = తెలియనివాడై
अटवीम् = అడవిని
अतीव = మిక్కిలి
अधिगतान् = పొందబడిన
अधिरुह्य = ఎక్కి
अनर्थदायकम् = ప్రయోజనాన్ని కలిగించనిది
अनालोच्य = ఆలోచించకుండా
अनुभूतवान् = అనుభూతిని పొందాను
अन्तरङ्गम् = హృదయం
अन्यमनस्कः = ఇతర విషయాలపై మనస్సు కలిగినవాడై
अभ्यस्तवान् = అభ్యసించాడు
अमृतफलयुक्तः = అమృతఫలములతో కూడినది
अरुचिः = రుచిలేనిది
अवगन्तुम् = అర్థం చేసికొనుటకు
अविचार्य = విచారించకుండా
अशेषम् = సంపూర్తిగా
असहायौ = సహాయం లేనివారై

आ

आक्रम्य = ఆక్రమించి
आदिष्टवान् = ఆదేశించెను
आनीय = తెచ్చి

उ

उपवेष्टुम् = కూర్చొనుటకు

क

कर्णे = చెవియందు
कतिपयान् = కొన్నింటిని
कपोतः = పావురము
कम्पयन् = కదిలిస్తున్నవాడై
करौ = రెండుచేతులు
काकाय = కాకికొరకు
काननवृद्धिम् = అడవుల అభివృద్ధిని
कुर्वाणाः = చేస్తున్నవారై
कोटरे = తొఱ్ఱయందు
क्लेशान् = కష్టములను

ग

गर्दभः = గాడిద
गर्दभवर्य! = శ్రేష్ఠమైన గాడిదా!
गोसम्पत्तिम् = గోసంపదను

APSCERT

च

चतुरः = నేర్పరి

चालयन् = నడిపిస్తున్నవాడై

छ

छित्त्वा = తెంపి

ज

जायापती = భార్యాభర్తలిద్దరు

ज्ञातवान् = తెలుసుకొన్నాను/ తెలుసుకొన్నాడు

त

त्यक्तवान् = విడిచిపెట్టెను

द

दारुदलैः = కర్రముక్కలతో

दुर्दैवात् = దురదృష్టంవలన

न

नितराम् = మిక్కిలి

निद्रातः = నిద్రనుండి

निधाय = ఉంచి

निमील्य = మూసుకొని

नियुक्तवान् = నియమించెను

निर्जित्य = ఓడించి (తొలగించి)

निर्धनः = ధనహీనుడైన

निवेद्य = నివేదించి

नीत्वा = తీసుకొనివెళ్ళి

प

परस्मिन् = మరొకదాని యందు

पराजितान् = ఓడింపబడినవారిని

पराजितवान् = ఓడించాడు/ను

परिमार्ष्टुम् = తుడిచివేయుటకు

पक्ष्मणी = రెండు కనురెప్పలు

पिकः = కోకిల

पितामही = నానమ్మ

पुस्तकस्मूतः = పుస్తకాల సంచి

पूर्वापरौ = ముందు వెనకలను

पृष्ठतः = వెనుక వైపు

पौत्रः = మనుమడు (కుమారుని కుమారుడు)

पातयितुम् = పడవేయుటకు

ब

बह्वीः = చాలా

भ

भद्राणि = శుభములను

भविष्यन्तीषु = జరగబోయే వాటియందు

AP SCERT

भित्तिपत्रम् = గోడపత్రికను
भुजङ्गः = పాము

म

मत्वा = తలచి
मुक्तः = విడిచి పెట్టినవాడై/డు
मुग्धाः = ముగ్ధులైనవారు

र

रिपुः = శత్రువు

ल

लक्षितवान् = గుర్తించెను

व

वस्त्रापणे = బట్టల దుకాణమందు

श

शकटम् = ఒంటెను
शकलम् = ముక్కను
शुकः = చిలుక

स

संयोज्य = కలిపి
सङ्केतम् = చిరునామాను
सद्यः = వెంటనే
सन्तः = సత్పురుషులు
सपदि = వెంటనే
सम्भाषणशीलः = మాట్లాడే స్వభావంగల
समीकरागारे = బాగుచేసే దుకాణమందు
सुप्रजाः = మంచి సంతానము
स्कन्धे = భుజమందు
स्वीकर्तुम् = స్వీకరించుటకు

ह

हन्तुम् = చంపుటకు

APSCERT

क्रियापदकोशः

अ

अकरोत् = చేసెను
अवदत् = చెప్పెను
अवसताम् = నివసించుచుండిరి (ఇద్దరు)
अक्रीडत् = ఆడెను
अभवताम् = ఇద్దరు ఉండిరి
अस्तु = ఉండనిమ్ము

आ

आकर्षति = ఆకర్షించుచున్నాడు / చున్నది
आख्याति = చెప్పుచున్నాడు / చున్నది
आदिदेश = ఆదేశించెను

इ

इच्छन्ति = కోరుచున్నారు

ख

खादेत् = తినాలి

ग

गच्छतः = ఇద్దరు వెళ్ళుచున్నారు
गच्छेत् = వెళ్ళాలి
गायामि = పాడుచున్నాను

ज

जायन्ते = పుట్టుచున్నవి / కలుగుచున్నవి
जहाति = విడిచిపెట్టుచున్నాడు

त

तिष्ठत्तु = నిలువుము/నిలుచుగాక

द

द्रावयति = కరిగించుచున్నాడు / చున్నది
दर्शयामि = చూపించుచున్నాను
दास्यामि = ఇవ్వగలను

न

निगृह्णति = దాచుచున్నాడు / చున్నది
निवारयति = నివారించుచున్నాడు / చున్నది

प

प्रतिगृह्णाति = తిరిగితీసుకొనుచున్నాడు / చున్నది
प्रेरयिष्यामि = ప్రేరేపించగలను

भ

भुङ्क्ते = తినుచున్నాడు / చున్నది
भोजयते = తినిపించుచున్నాడు

म

मन्ये = తలచుచున్నాను

य

यतिष्ये = ప్రయత్నించగలను

र

रक्षत = రక్షించండి

व

वर्जयन्तु = వదిలిపెట్టండి
वितराम् = పంచుదాము
विनिवेदयामि = నివేదించుచున్నాను
व्यसर्जयन् = విడిచిపెట్టిరి

श

शक्यते = తగి ఉన్నది
शक्ष्यामि = తగి ఉండగలను
शृणुयात् = వినవలెను

AP SCERT